- Title – दयानन्दमतमर्दन
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 53/106 – 16,27-69
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language – संस्कृत
- Period –
- Beginning – सामवेदीयकेनोपनिषदि खं. 3 ब्रह्म ह देवेभ्यो विजिग्ये तस्य
- End – गोविन्दरामचरिते दयानन्दमतमर्दने द्वितीय। खण्ड: समाप्त: शुभमस्तु
- Colophon-
- Illustrations -
- Source -
- Subject - दयानन्द मत खण्डन
- Revisor -
- Author - गोविन्दराम
- Remarks- अपूर्ण है।

सलोनी

सामवेदीयकेनोपनिषदि खं०३ ब्रह्म ह देवेभ्यो विजि
ग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्ता
स्माकमेवायं विजयोऽस्माकमेवायं महिमेति १ तद्धैषां
विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानत किमिदं
यक्षमिति २ तेऽग्निमब्रुवन्जातवेद एतद्विजानी
हि किमेतद्यक्षमिति तथेति ३ तदभ्यद्रवत्तमभ्य
वदत् कोऽसीति अग्निर्वा अहमस्मीत्यब्रवीज्जातवे
दा वा अहमस्मीति ४ तस्मिंस्त्वयि किं वीर्यमित्य
पीदं सर्वं दहेयं यदिदं पृथिव्यामिति ५ तस्मै तृ
णं निदधावेतद्दहेति तदुपप्रेयाय सर्वजवेन तन्न
शशाक दग्धुं स तत एव निववृते नैतदशकं विज्ञा
तुं यदेतद्यक्षमिति ६ अथ वायुमब्रुवन्वायवेतद्वि
जानीहि किमेतद्यक्षमिति तथेति ७ तदभ्यद्रवत्त
मभ्यवदत्कोऽसीति वायुर्वा अहमस्मीत्यब्रवीन्मा
तरिश्वा वा अहमस्मीति ८ तस्मिंस्त्वयि किं वीर्य
मित्यपीदं सर्वमाददीयं यदिदं पृथिव्यामिति
९ तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय
सर्वजवेन तन्न शशाकादातुं स तत एव निववृते
नैतदशकं विज्ञातुं यदेतद्यक्षमिति १० अथेन्द्रमब्रु

2

४६

वन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तद
भ्यद्रवत्तस्मात्तिरोदधे ११ स तस्मिन्नेवाकाशे स्त्रि
यमाजगाम बहुशोभमानामुमां हैमवतीं ताꣳ हो
वाच किमेतद्यक्षमिति १२ खं० ३ सा ब्रह्मेति हो
वाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव तदि
विदाञ्चकार ब्रह्मेति १ तस्माद्वा एते देवा अतितरामि
वान्यान्देवान् यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्प
र्शुस्ते ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति २ तस्माद्वा इ
न्द्रोऽतितरामिवान्यान्देवान् स ह्येनन्नेदिष्ठं पस्पर्श स ह्ये
नत्प्रथमो विदाञ्चकार ब्रह्मेति ३ तस्यैष आदेशो य
देतद्विद्युतो व्यद्युतदा ३ इतीन्न्यमीमिषदा ३ इत्यधिदैव
तम् ४ अथाध्यात्मं यदेतद्गच्छतीव च मनोऽनेन चैत
दुपस्मरत्यभीक्ष्णꣳ सङ्कल्पः ५ तद्ध तद्वनं नाम तद्वन
मित्युपासितव्यं स य एतदेवं वेदाभि हैनꣳ सर्वाणि
भूतानि संवाञ्छन्ति ६ अथ सङ्गतिर्नामायमर्थः सं
क्षेपतः अविज्ञातत्वाद्ब्रह्मासदिति मन्दबुद्धिव्यामोहाप
नयनाय वा ब्रह्म सर्वप्रशास्तृ देवानामपि देवः देवा
सुरयोर्जयाजयहेतुरिति ख्यापनाय वा ब्रह्मज्ञानां देवाग्न्या
दीनां देवेभ्यः श्रेष्ठत्वमिति ज्ञापनाय वाऽविज्ञेयत्वे निरू
पणाय वा कर्तृत्वाद्यभिमानस्य मिथ्यात्वप्रदर्शनाय वेयमा
ख्यायिका - ब्रह्म सच्चिदानन्दलक्षणं ह किल देवेभ्यो वि

जिग्ये जयं लब्धवत् देवासुरसंग्रामे जगदारातीनीश्वरसेतुभेत्तॄन्
असुरान् विजित्य देवेभ्यो जयं तत्फलं च प्रायच्छज्जगतः स्थित्यै त
स्य ह किल ब्रह्मणो विजये देवा अग्न्यादयोऽमहीयन्त महि
मानं प्राप्तवन्तस्तदात्मसंस्थस्य प्रत्यगात्मन ईश्वरस्य सर्वक्रि
याफलसंयोजयितुः प्राणिनां सर्वशक्तेर्जगतः स्थितिं चिकीर्षोर
यं जयो महिमा चेत्यजानन्तस्ते देवा ऐक्षन्त अग्न्यादिस्वरूपपरि
च्छिन्नात्मकृतोऽस्माकमेवायं विजयो महिमा च जयफलभूतोऽस्मा
भिरनुभूयते नास्मत्प्रत्यगात्मभूतेश्वरस्येति २ तद्ध किलै

कृत×

षां मिथ्येक्षणं विजज्ञौ विज्ञातवद्ब्रह्म- सर्वेक्षितृ हि तत्सर्व
भूतकरणप्रयोक्तृत्वाद्देवानां च मिथ्याज्ञानमुपलभ्य मैवा
सुरवन्मिथ्याभिमानात्पराजयेयुरिति तदनुकम्पया देवा
न्मिथ्याभिमानापनोदनेनानुगृह्णीयामिति तेभ्यो ह किला

त्रि×
देवेभ्यः

र्थाय प्रादुर्बभूव स्वकीयमाहात्म्यनिर्मितेन विस्मापनीयेन
रूपेणा देवानामिन्द्रियगोचरे तत्प्रादुर्भूतं ब्रह्म तन्न व्यजा

प्रादुर्बभू
व×

नन्त विज्ञातवन्तो देवाः किमिदं यक्षं महद्भूतमिति २
ते तदजानन्तो देवाः सान्तर्भयास्तद्विजिज्ञासवोऽग्निमग्रगामि
नं जातवेदसं सर्वज्ञकल्पमब्रुवन् हे जातवेद एतदस्म
द्गोचरस्थं यक्षं विजानीहि विशेषतो यद्यक्षं तथास्त्विति ३
तद्यक्षमभ्यद्रवत्प्रतिगतवानग्निः तं पप्रच्छ तत्समी
पेऽप्रगल्भत्वात्तूष्णींभूतं तद्यक्षमभ्यवदत्कोऽसीति २ एवं ब्र

वै
अग्निः

ष्टोऽग्निरुवाच अग्निर्नामाहं प्रसिद्धो जातवेदा इति च
नामद्वयेन प्रसिद्धतयात्मानं श्लाघयन्निति ४ तं ब्रूतवो
वन्तास्मिन् एवं प्रसिद्धगुणानामवति त्वयि किं सामर्थ्यमसो

१८

ब्रवीदिदं जगत्सर्वं दहेयं भस्मीकुर्य्यां यदिदं स्थावरादि पृथिव्यां
पृथिव्यामित्यंतरिक्षस्यस्याप्युपलक्षणं ५ तस्मै तृणमभिमा
नवते ब्रह्म तृणं निदधौ अग्नेः पुरः स्थापितवद्ब्रह्मणा तत्तृण
मात्रं ममाग्रतो दह नचेदस्य दग्धुं समर्थोऽसि दग्धुं त्वाभिमा
नं सर्वत्र मुञ्च इत्युक्तः तत्तृणमुपप्रेयाय तृण समीपं गत्वा सर्वजवे
न सर्वोत्साहकृतेन वेगेन न शशाक दग्धुं ब्रीडितो हतप्रतिज्ञस्तत एव
यक्षादेवं तूष्णीं देवान् प्रति निववृते निवृत्तः नैतदशकं विज्ञातुं य
क्षवानहम् ६ वानाद्गमनाद्गंधनाद्वा वायुः मातर्य्यन्तरिक्षे श्व
यतीति मातरिश्वा ७-८ आदद्यां गृह्णीयाम् ९-१०-
तस्मात् तामसमीपगतादिं तत्तृणं तिरोभूते इन्द्रस्याभि
मानो नितरां निराकर्त्तव्य इत्यतः संवादमात्रमपि नादात्तस्मै ब्रह्म
११ यस्मिन्नाकाशप्रदेशे आत्मानं दर्शयित्वा ब्रह्म तिरोभूतं तत्रका
ले तत्रैवेन्द्रस्तस्थौ न निवृत्तोऽग्न्यादिवत् किमेतद्यक्षमिति ध्यायन्
इन्द्रस्य तस्मिन्नेव क्षणे विद्योमारूपिणी प्रादुरभूत् स्त्रीरूपा
इन्द्र तामुमां शोभनतमां सुवर्णाभरणवतीमिव अथवा हिम
वतः सुतां पार्वतीं सर्वज्ञेनेश्वरेण सार्वर्त्तत इति ज्ञात्वा समर्था इति ता
त्वा तामुपजगाम प्रोक्तं स्वरूपम् १२ ईश्वरेण जितान् असुरान्स्वयं त
न निमित्तमात्रं तस्य ब्रह्मणो विजये यूयं महीयध्वं महिमानं प्राप्नुथ
एतदिति क्रियाविशेषणार्थम् ततउमावाक्यान्तं इन्द्रोऽवधारयत्
ऽवेति नस्वातन्त्र्येण १ अन्यान्देवान् अतितरां अतिशेरतेइव
यद्यन्तरादेत्यादयः ते वा ददर्शनादिना समीपं गताः तानद्ब्रह्मप्रथ
मः प्रथमाः सन्तः ब्रह्मेति विदाञ्चक्रुः २ अग्निवायुभ्यामिन्द्रस्यातिशयं
ताभ्यां पूर्वमिन्द्रेण श्रुतमतइन्द्रो नितरामिवेत्येवार्थिकम् ३ तस्ये
ति निरूपमस्य ब्रह्मणो येनोपमानेनोपदेशः सोयमादेशः अ
इवार्थकः विद्युतो विद्योतनमिव न्यमीमिषदिवेत्यो विषयं प्रति प्र
काशतिरोभावौ विवचेति अधिदेवतं देवताविषयं ब्रह्मणः उपमानम् ४

पुरां भिन्दुर्युवा कविरमितौजा अजायत - इन्द्रो विश्व
स्य कर्म्मणो धर्त्ता वज्री पुरुष्टुतः ऋ॰ सू॰ ११ मं॰ ४ अ॰ १ अनु॰ ३
अस्यार्थः पुरां असुरपुराणां भिन्दुर्भेत्ता युवा व
लीपलितादिरहितः कविर्मेधावी अमितौजा अ
तुलबलः विश्वस्य सर्वस्य कर्मणो ज्योतिष्टोमादे
र्धर्त्ता पोषकः - वज्री वज्रयुतः पुरुष्टुतः बहुवि
धस्तत्कर्मणि स्तुतः एतादृशोयमिन्द्रः अजाय
त सम्पन्नः - अत्रेन्द्रस्य पुरन्दर पुरुहूत वज्रिना
म्नामर्थनिरूपणं युवत्वकथनं च
इन्द्रवायू मनोजुवा विप्रा हवन्त ऊतये - सहस्राक्षा
धियस्पती ऋ॰ अ॰ २ सू॰ २२ ऋ॰ ३
विश्वान्देवान्हवामहे मरुतः सोमपीतये - उग्रा
हि पृश्निमातरः ऋ॰ अ॰ २ मं॰ १० अत्र मरुत्संज्ञकदेवा
नामाह्वानं पृश्निपुत्रत्वकथनं च -
शिप्रिन्वाजानाम्पते शचीवस्तव दंसना - आतू न
इन्द्र संशय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ
अनु॰ ६ ऋ॰ अ॰ २ सू॰ २९ ऋ॰ २ शचीवः शचीयुक्तेन्द्र शि
प्रिन् शोभननासिक तुवीमघ बहुधनेन्द्र इति सं
अत्र शचीपति सुनासीर मघवन् शब्दार्था उक्ताः -

पृश्निमा
तरः मरुः
पुत्राः ×

[illegible]

२५
२६
२७

निष्वापया मिथूदृशा सस्तामबुध्यमाने - आ तू न
इत्यादि पूर्ववत् ऋ॰ अ॰ २ सू॰ २९ ऋ॰ ३ अस्यार्थः
मिथूदृशा परस्परं सङ्गतत्वेन दृश्यमाने यमदूतौ
निष्वापय नितरां सुप्तौ कुरु ते चास्मान् मारयितु
मबुध्यमाने सस्तां निद्रां प्राप्नुताम् - अत्र
शुनःशेफकर्तृकायमदूतयोः स्वापनाय प्रार्थना

त्वमग्ने प्रथमो ऽङ्गिरस्तमः ऋ॰ अ॰ २ सू॰ ३१ मं॰ २॰
इति मन्त्रे ऽग्नेरङ्गिरो नामकर्षेर्जनकत्वमुक्तम्
तत्र व्याख्यानमध्ये श्रीमाधवाचार्यपादाः प्रमाण
यन्ति येऽङ्गारास्तेऽङ्गिरसो ऽभवन्निति

त्वमग्ने मनवे द्यामवाशयः ऋ॰ अ॰ २ सू॰ ३१ मं॰ ४
इत्यादि मन्त्रे हे अग्ने त्वं मनोरनुग्रहाय द्यां द्युलोकम
वाशयः शब्दितवानसि पुण्यकर्मभिः साध्यो द्यु
लोक इति प्रकटितवानसि इत्ययमर्थो निरूपि
तः

अहन्वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन - स्क
न्धांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्
पृथिव्याः ऋ॰ अ॰ २ सू॰ ३२ मं॰ ५ अस्यार्थः वृत्रतरं
लोकानामावरकं अन्धकाररूपम् व्यंसं विगतां
संछिन्नबाहुर्यथा भवति तथा हनत् कुलिशेन

कुठारेण – अहिर्वृत्रः उपपृक् सामीप्येन संपृक्तः
शेते छिन्नकाष्ठवद् भूमौ पततीत्यर्थः वज्रेण वज्र
निःपादितेन विवृक्णानि छिन्नानि –
अपादहस्तो ऽअपृतन्यदिन्द्रमास्य वज्रमधि सा
नौ जघानेत्यादि ऋ. अ. २ सू. ३२ ऋ. ७ सामीप
वेन सानु सह शेते ठ स्कन्धे –
इन्द्रस्य नु वीर्याणि प्रवोचमित्यारभ्य ऋ. अ. २
सू. ३२ पञ्चदशाभिर्ऋग्भिरिन्द्रस्य वृत्रेण साकं
युद्धस्य वर्णनम् इन्द्रो यातो वसितस्य राजेत्यन्तं
पञ्चदशर्चं सूक्तम् – एवं चाभिप्रायः पञ्चदश
ऋग्भिः पञ्चदशर्चेन सूक्तेन चेन्द्रादीनां देवतानां हस्त
नासिकारसनकुक्षिकर्णजिह्वाद्यङ्गानां रथानां हया
नां शस्त्राणां च पुनः पुनर्निरूपणस्याभ्युपगमात्
युद्धादिरथ्यं चमसादितत्त्वाणाद्युपगमाच्च वक्तृत्वा
वगतेश्च तत्पत्नीनामपत्यानां च तत्पितृपुत्राणां
ग्रहणेन चावाहनभक्षणपानादिप्रतिपादनेन
च स्पष्टमग्न्यादिदेवानां वेदकर्मकाण्डभागे उपा
स्यतयोपलभ्यमानत्वात् कथमीश्वरस्यैवोपास्य
त्वेनाग्न्यादीनां कथं वा तेषामचेतनत्वेनोच्यतद

२८ तिहे विद्वांसो भवद्भिरेव स देवानां प्रियः प्रष्ट
व्य इति - न च यदा ते हर्य्यता हरी वावृधाते दि
वेदिवे - आदित्ते विश्वा भुवनानि येमिरे इति म
न्त्रव्याख्यावसरे ऋग्वेदादिभाष्यभूमिकायाः
५: पंचमेंके दयानन्देन हरी इत्यस्य आकर्षणप्र
काशन हरणशीलौ बलपराक्रमगुणाविश्वो
किरणौ वेति विवरणस्य त्कथं पूर्वोक्तहरि वक्ष्यमा
पदेन प्रसिद्धाश्वयोरेव ग्रहणं भवद्भिः प्रतिपा णत्वा
द्यते नैवाकृष्मेनेति मंत्रेपि रथशब्दस्य रमणा
दिगुणवाचितायास्तेन निरूपयिष्यमाणत्वात्क
थं प्रसिद्धरथस्याश्विकत्व[illegible]मिति प्रोच्यत इति वि
च्यम् बलपराक्रमौ विहायाश्वाविति वदता निरु
क्तकारेण सह विरोधात् युक्ता हरी रथे इत्यादि
पूर्वोक्तमन्त्रे इमा धाना घृतस्नुवो हरी इहोपवक्ष
त इति पूर्वोक्तमन्त्रेच हर्य्योः स्थाता इति प्रत्यन्तरे
च उपुनः सुतमा गहि हरिभिरिन्द्र केशिभिरिति
मन्त्रे ५ हर्वश्व[illegible] च रथे अश्वौ योजयित्वा गच्छ इन्द्र
स्यापयित्वा समानय केशयुक्तै हरिभिरागच्छेत्या

द्याकारकानामर्थ्यस्य स्पष्टमुपलभ्यमानत्वाच्च य
इन्द्र यमने युजानत हर्षमनसा हरी इति नदन्तासत्या
भ्यां परि ज्मानं सुखं रथमिति यावां कशामधुमत्य
श्विना स्तुन तावतीति नहिवामस्ति दूरके यत्रार
थेन गच्छथेति पूर्वोक्तमन्त्रवर्णैः सह विरोधाच्च
शाश्वदिन्द्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्व
द्भिर्धनानि – सनो हिरण्यरथं दंसनावान्त्स नः
सनिता सनये स नो दात् ऋ०अ०२ सू०२९ ऋ०१६
अस्यार्थः [illegible] इन्द्रः शाश्वत्सर्वदा धना
नि वैरिसंबन्धीनि जिगाय जितवान् अश्वैरितिशे
षः कीदृशैः पोप्रुथद्भिः चासमन्तानन्तरभाविन
मोष्ठशब्दं कुर्वद्भिः नानदमानागतं हेषाशब्दं कुर्व
स द्भिः शाश्वद्[illegible]द्भिः पुनः पुनर्भृशं वॉ[illegible]द्भिः दंसना श्वX
वान्कर्मवान् सनिता दाता स इन्द्रो नः सनये स
नाX म्भजनाय हिरण्यं सुवर्णनिर्मितं रथमदात् सनइतिद्वि
रुक्तिरादरार्था –
युञ्ज्वाहि केशिना हरी वृषणा कक्ष्यप्रा – अथा
न इन्द्र सोमपा गिरामुपश्रुतिं चर ऋ०अ०२स्८

पराक्रमयोः पृथक्पृथये त्योश्च शब्दकर्तृत्वमतिश
यितस्थैर्य वैराग्यारायितृत्वं पौनःपु[illegible]न्येन श्वस
त्वं केशधारित्वं मयूरसदृशरोमवत्त्वं मन्द्रध्व
निमत्त्वं सेचनसमर्थत्वं उदरवत्त्वं नरक्षुद्रजि
समर्थपशुत्वं ~~सकृत्~~नैकशाताऽनविष
यत्वं मनोयुक्तत्वं च सङ्कल्प्यते इन्द्रस्य तयोस्त
पर्य्यालोचनं चोपपद्यते कथं नारायणस्य योजन
परिमाणवत्त्वमन्तरिक्षाधिकरणकगमन
कर्त्तृत्वं च सम्भाव्यते तस्माद्दयानन्दकृतोऽर्थो
हरिरथशब्दार्थोऽमूर्त्तजनरञ्जकरावेति सुधी
भिर्ज्ञेय इति एवं चैयताग्रन्थेनाग्निमीलइ
त्यादिमन्त्रेष्वग्न्यादिदेवानामुपास्यत्वं प्रतिपा
दितं नेश्वरस्येति सिद्धान्तितम् तत्त्वैवेश्वरे[illegible]
नेकत्वसशरीरत्वाशनपानादिमत्त्वगमना
गमनवत्त्वादीनामङ्गीकारेणेश्वरः देवादिदेह
धारणं न करोतीति तदुक्तसिद्धान्तो विरुद्ध्ये
तेति अतएव भगवता पाणिनिना निरूपितम्
इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवय

३०

वतमात्रलाचार्य्यागामात्मक इति इन्द्रादीनांच
सांमात्रलाचार्य्ययोश्च प्रयोगदर्शनादिति
भाष्यंच प्रयोगादरव्यायामितिसूत्रे स्वर्गादेव
तायांचाव्याख्य इतिवार्तिकं देवताद्वंद्वेचेति इ
दग्ने: सोमवरुणयोरिति इद्वृद्धाविति विधी
नेतिपाणिनीयसूत्राणिचै[illegible]न्द्रादी
नां देवतावाचकत्वरावसङ्गच्छन्ते कथमन्य
थेस्वरे शरीरे चेतने च्यादौ च प्रयोगैश्रमा इष्टम
णेनेति देवताशब्दस्यविधवाचकत्वाङ्गीका
रेतु विद्वन्मनुजाद्युपादानकदेवताभेदविषय
कतात्पर्य्यग्राहिकाभि: पूर्वोक्तश्रुतिभिर्विरो
धोऽङ्ग: परिहर: - ×यावती वैदेवता इत्यादिभि:×
मधुवादिविद्याभिधायिकाभिश्च श्रुतिभिर्विरो
धोपपत्तिवार्य: नाश्रश्रुतय: ऋग्वेदादिभाष्य
स्य भूमिकातृतीयाङ्कं मन्त्रमयी देवतेति तदुक्ते मन्त
स्वरूपत्वदावहरिष्यते किञ्चविद्वांसमनुजानां मन्तत्त्व×
संप्रत्यविद्यमानत्वेन यज्ञेन सङ्गान सोमपाना
दीनांतेभ्यो[illegible]नादिप्रार्थनायाश्चानुपपन्नत्वेन
वेदोक्तकर्मणामप्राकर्षकरणत्वेन वेदस्यैवनैरर्थ

३०

क्षमापद्येत अनेकप्रतिपत्त्यादिसामर्थ्यनिरूपक
प्रमाणाभावेनतेषु तेषु यज्ञेषु तेषां भगवदमनाग
मनासंभवश्च नहवैदेवाश्नन्ति नपिबन्त्येतदेवा
मृतंदृष्ट्वातृप्यन्तीत्येवंजातीयकात्प्रवादेनसिद्धःप्र
जयापश्वभिसन्धीयतीत्येवंजातीयकाच्छ्रुतिर्वि
रुध्येतेति अन्यदकुवकाक्यं तदग्रेसंक्षेपेणावद्य
तेइति— इतिदयानन्दमतमर्दने फगवाडानग
रवासिश्रीभाकरंगोविन्दरामकृते प्रथमः स्तबकः

सातीय x

३१

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवाँ एह
वक्षति २ माधवाचार्य्यो यद्यरोधेनायं संक्षिप्तोर्थः
पूर्वैः [illegible] ऋषिभिर्भृग्वादिभिर्नूतनैरस्मदादिभिः
स्तुत्यः सोग्निरिह यज्ञे देवान् हविर्भुज आवहत्वि
ति यच्च ऋषिभिर्मन्त्रद्रष्टृभिः प्राणैस्तर्कैश्च स्तुत्यो वे
दनीयश्च स ईश्वरः देवानिन्द्रियाणि विद्यादिदि
व्यगुणान् दिव्यान् दिव्यभोगांश्चेह संसारे जन्मन्या
त्मनि च आवहतु प्रापयत्विति शेष इति तन्न
अस्या ऋचो यज्ञप्रकरणस्थत्वेनेहेति पदेन यज्ञ
स्यैव ग्रहणमुचितत्वेन संसाराद्यर्थानां प्रकरणावि
रुद्धत्वात् नराशंसमिह प्रियमस्मिन्यज्ञ उपह्वये-
मधुजिह्वं हविष्कृतम् ऋ॰ सू॰ १३ ऋ॰ ३ इति मन्त्रे म
धुरभाषिजिह्वो येन तन्नराशंसनामकाग्नेर्देवताया य
त्रावाह्वाने भगवद्देवपूज्यत्वमभ्यर्च्ये स हास्मिन्यज्ञ इ
ति पदे स्पष्टमुपलभ्यमानत्वाच्च किञ्च इह जन्मनी
त्यादिरर्थोपि न्यूनत्वादत्र सङ्कल्प्ये जन्मान्तरीयेन्द्रिय
भोगाद्यर्थमपि तत्प्रार्थनाया उचितत्वात्तन्न इति शेषस्या
मनौत्पत्तेनान्वयानर्हत्वाच्च अग्निर्यः पूर्वैर्ऋषिभिरि
[illegible]ड्यो वंदितव्यो स्माभिश्च नूतनैः स देवानिह
वहत्विति व्याख्यातो यास्केन स हविरुद्धत्वाच्च

यात्र

नन्वत्र दीर्घह्रस्वतर्कप्रमाणयोरविनाभावकत्वाङ्गीका
रे यास्कः केवलमस्माभिरितिवदेत् कथंवात
योरचेतनत्वेन वन्दनकर्तृत्वाभावादीप्सइतिपदं
वदेन X वंदितव्य इति विवृणुयात्- कथं वा सकृदुच्चरि
तयोर्देवर्षिशब्दयोर्बहुर्थबोधकत्वमेकवाक्ये
सम्भवति सकृदुच्चरितः शब्दः सकमेवार्थं बोधय
तीति सिद्धान्तविरोधात्- X [illegible] नायमाम्नायप्रव
चनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते
तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामिति काठक
श्रुत्यां तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुत्या चब्रल
ग्णस्तर्काविषयत्वेन प्रतिपादनाच्च युक्तं चैतत् रू
पाद्यभावान्नायं प्रत्यक्षस्य गोचरो लिङ्गाद्यभावाच्चना
नुमानादीनामागममात्रसमधिगम्यत्वाद्यमर्थो
धर्मवत् तथा च श्रुतौ नैषा तर्केण मतिरापनेया प्रो
क्तान्येनैव सुज्ञानाय प्रेष्ठेति को अद्धा वेद क इह प्र
वोचदियं विसृष्टिर्यत आबभूवेति चैतत् [illegible] न
स्वतर्कविषयत्वं दर्शयतः स्मृतिरपि अचिन्त्या
:खलु ये भावा न तांस्तर्केण योजयेदिति अव्यक्तो
यमचिन्त्योयमविकार्योयमुच्यत इति च यौगिक

वला अतिरेकेण मननं क्रियते एवं तर्कमा
दर्तव्यं दर्शयतीत्युच्यते नानेनमिथ्याकुतर्कन
कस्यामलाभः सम्भवति अन्यतगृहीतराव
च्छतर्कोनभवाङ्गत्वेनाश्रीयते अतएवभग
वताबादरायरोनसूत्रितम् [illegible] तर्का
प्रतिष्ठानादप्यन्यथानुमेयामितिचेदेवमप्य
विमोक्षप्रसङ्गः अ०२ पा० ननुसर्वतर्काप्र
तिष्ठायांचलोकव्यवहारोच्छेदप्रसंगः अतीत
नवर्त्तमानाध्वसामान्येनह्यनागतेप्यध्वनिसु
खदुःखप्राप्तिपरिहाराय प्रवर्त्तमानोलोको
दृश्यते अन्यथे विप्रतिपन्नोवाक्यभासनिराक
रणेनसम्यगर्थनिर्धारणंतर्केणैवबाक्यवृत्तिनि
रूपणरूपेणक्रियते मनुरपिचैवमेवमन्यते
प्रत्यक्षंचानुमानंचशास्त्रंचविविधागमम् त्र
यंसुविदितंकार्यंधर्मशुद्धिमभीप्सतेति आ
र्षधर्मोपदेशंचवेदशास्त्राविरोधिना यस्तर्के
णानुसन्धत्तेसधर्मंवेदनेतरइतिच रावंचस
वद्यतर्कपरित्यागेनिरवद्यस्तर्कः प्रतिपत्तव्यो

भवति न हि पूर्वं जो मूढ इत्यासीदित्यात्मनापि मूढे
न भवितव्यमिति काङ्क्षितं मन्यते तस्मात्स्वायमेवा
र्थं कारस्तर्कस्याप्रतिष्ठितत्वं नामेति चेन्न
एवमप्यविमोक्षप्रसङ्गः यद्यपि क्वचिद्विषये
तर्कस्याप्रतिष्ठितत्वमुपलक्ष्यते तथापि प्रकृते
प्रसङ्गे तावदप्रतिष्ठितत्वदोषादनिर्मोक्षस्तर्क
स्य न शक्यमतिगम्भीरमीश्वरयाथात्म्यं मुक्तिनि
बन्धनमागममन्तरेणोत्प्रेक्षितुमपि शक्यम्
ह्यस्य ताद्यगोचरत्वात् तस्माल्लिङ्गैकसमधि
गम्योयमीश्वरो न तर्कगम्यः तर्कोणोचरस्य रवि
रोधेनाप्रतिष्ठितत्वात् एवं च शब्दे मनोवाग
गोचरत्वेन तर्कविषयीभूतस्य च प्रमेयतया गति
त्वं चेन शिष्टाद्वस्तात्तर्काभिधायकत्वं कल्पन
मयुक्तं वाम् न च परस्मात् तु व्याकृतविहृ
तस्मात्तु देवान तु वक्तो न कृषिभे विद्धतीति
तेभ्य एतत्तर्कमतिविधाय मन्त्रार्थचिन्तामृ
तमभ्यूहमिति निरुक्तात्तर्कविषय ईश्वरः
प्रतीयत इति वाच्यम् मन्त्रार्थविचारे तर्कोव

प्रतर्का प्रमेयता ×

वा

मनोनेश्वर इति निरुक्तार्थात् न हि तत्रार्थे शब्दस्य
तर्कपदवाच्यत्वं किंतु ऋषिप्रतिनिधित्वेन तत्र
तर्कस्य प्रदानमुक्तम् ॥ यत्तु सनमन्येनायमे
वाग्निरित्यधेते उत्तरे ज्योतिषी अग्नीडयेते इतिति
ऋ. ७ स्कं ५६ सूक्तान्तरमेश्वरो विद्युदादिदिव्यश्रे
नावन्ती उत्तरे ज्योतिषी अग्र्वग्हीनं योग्ये इतिव
दति तन्न परमेश्वरे दृष्टिलोत्तरे र्वाधः कल्प
नायाअयुक्तत्वेन दिव्यभौमाग्न्यभिमानिदेवता
प्रतिपादनपरत्वान्निरुक्तस्य - स्वायते शब्दप्रयो
गे किमित्यवाचकं प्रयुञ्जीमहइति न्यायेन सति
प्रसिद्धार्थेन निर्वाहे एताहृशाक्लिष्टकल्पनाया
अनुचितत्वाच्च एतेन माधवाचार्यादिवर्णि
ता[illegible]र्थेन वेदस्यानुप्रशयतां वदन्तस्तैवैव हृद
मतित्वं तदुक्तार्थानभिज्ञत्वात् ॥ यत्तु पूर्वैर्भिर्ज
गत्कारणस्येश्वरनैः कार्यशरीरस्थैः ऋषिभिः प्रा
णैः सह मनुष्यैरीप्सः वंशेऽन्वेषणीयश्चेत्यर्थः भा
ष्यार्थे तत्कृते ईश्वरसामर्थ्यप्रकृतिः परमाणव
श्चैतेजगत्कारणानितेषुये सूक्ष्माः प्राणास्तैराव
पूर्वैर्भिरिति पदेनोक्तास्ते सर्वदा निर्विकारा वस्ता

णऽधारकाश्च स्थूलजगति शरीरे च ये प्राणास्तेषां न्
ननेरितिपदेन ग्रहणम् शरीरेण सहैव तेषामुत्पत्ति
वृद्धि नयवत्त्वात् नैर्द्विविधप्राणैः सहाभ्यासात्
मध्यन्तर एवेश्वरः प्राणो नानिकथयति अत्रोच्यते
ईश्वरसामर्थ्यरूपा प्रकृतिः पृथिव्यादिचतुष्टयप
रमाणवो जगत्कारणानि ईश्वरादन्यत्र तिष्ठन्ती
श्वरे वा आद्ये ईश्वरस्यासमर्थत्वापत्तिः निराधार
स्य सामर्थ्यस्यान्यत्रावस्थानासम्भवश्च नहि मनु
ष्यादिसामर्थ्यस्यान्यस्मिन् स्थानेऽवस्थितिर्दृश्य
ते मनुष्यादिकं स्वाधारं विहायेति तेषामेव स्थूलज
गद्रूपेण परिणतत्वात् तस्य प्राणानां जगद्धारकत्व
कल्पनमप्यनर्थकम् ईश्वरसामर्थ्यरूपत्वेन ते
षामेव स्वधारकत्वस्य कल्पयितुं शक्यत्वात् द्विती
ये तदाधारस्येश्वरस्यैव तद्धारकत्वेन तदतिरिक्त
न तस्य प्राणानां ब्रह्माण्डधारकत्वकल्पनस्यानुचि
तत्वम् प्रत्युत प्रकृतिपरमाण्वाधारकाणां प्रा
णानां ब्रह्माण्डत्वेन परिणतानां प्रकृत्यादीनां धा
रकत्वमपि वक्तुमशक्यम् आधाराधेयभावव्य
त्यासात् किंच प्रकृतिपरमाणूनां जडत्वेन जग
त्कारणत्वमपि न युज्यते यतो वा इमानि भूतानि

२४

३४ जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति
तद्विजिज्ञासस्व तद्ब्रह्मेति श्रुतेर्जन्माद्यस्य यत इति
वैयासकसूत्राच्च न द्वैतं तत्कुरु स्यामिति श्रुतेरीक्ष
तेर्नाशब्दमिति बादरायणसूत्राच्च तस्माच्चेतनस्यैवा
भिन्ननिमित्तोपादानत्वं जगत इति अपि च घटोः स
ह मनसैव्यादिस्यापि प्रयुक्तम् सहार्थयोगेऽप्रधाने
तृतीया विधायकेन सहयुक्तेऽप्रधान इति पाणिनिसू
त्रेण सह विरोधात् न हि सहार्थः साहित्यम् न च
स्वसमभिव्याहृतक्रियादिसमकालिकक्रियादि
मत्त्वं कचित्समानदेशक्रियावत्त्वम् तथा च मन
आत्मनोः तन्वेव लाहूर क्रियावत्त्वे जगतां प्राणानां
तत्क्रियावत्वासम्भवात् - एतेन घटोः सहाभ्यां सा
दिव्यपि प्रयुक्तम् जगतां प्राणानां मध्यतः केतनस्या
कायस्याविकारिणः घाट्रेरशक्यत्वाच्चे [illegible] यद्यपि
सर्ववि ब्रह्मणः सर्वाधिष्ठानत्वेन सर्वज्ञत्वं तस्मात् सूत्र्यीयुप
लभ्यते तथापि प्राणमध्यत एव तत्सम्भावितीत्यस्मा
त्याधारतादेरित्यस्यायुक्तत्वमेव - तस्मान्निर्मूलं
निर्युक्तिकं चेदं व्याख्यानं सायणचार्यकृतं व्याख्यानं
शिष्टैरनादरणीयम् - प्रातर्नैर्नवीनैः घटोः शिल्प
विद्याविदः सत्केयुगिरन्चेदं व्यवस्थोत्ति सो निविह

पदार्थविद्यायां कलाकौशलस्य विमानानां यानानां दिव्यगगनावहन्ति
तिग्माकाँक्षेपतश्चेति ३४

द्वितीयोर्थस्तु सर्वथाप्रामादिकः लोहकारादिषु रूढिश
ब्दप्रवृत्तेरप्रामाणिकत्वात् निरुक्तानुरोधेनेडयीश्वरा
दपदपर्य्यायाधीश्वरणावाचकत्वेप्यन्वेश्वरणवाचक
त्वाभावाच्च देवशब्दस्य दिव्यगुणाढ्य परत्वेपि तिरेष
र्माभावाच्च

अग्निना रयिमश्नवत्पोषमेव दिवेदिवे- यशसं वी
रवत्तमम् ३ अत्र माधवः योयं होत्रास्तुत्योग्निस्तेना
ग्निना निमित्तभूतेन यजमानो रयिं धनमश्नवत्
अश्नोत् प्राप्नोत् की॰ रयिं प्रतिदिनं पुष्यमाणं तया
वर्द्धमानमेव न तु कदाचिदपि क्षीयमाणम् पु॰ की॰
यशसम् दानादिना यशोयुक्तम् पु॰ की॰ वीरवत्तम
म् अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतम् सति
हि धने पुरुषाः सम्पद्यन्ते इति रयिशब्दो मघमि
त्यादिधननामसु पठितः इति

यदुक्तं दयानन्देन अत्राप्यग्निशब्दस्येश्वरवाचकत्वं त
दतितच्छान्तिमूलकम् पूर्वोक्तयुक्तिश्रुतिनिरु
क्तविरुद्धत्वात्- तदुक्तं द्वितीयोर्थोपि वाल
मनोरञ्जनसमर्थः सर्वदा विद्वद्भिस्त्येव्यएव

मेऽहं होतारमत्विजं चित्रभानुं विभावसुम्- अग्निमीळे स उ श्र
वत् ६ विश्वं होतारमद्रुहं धूमकेतुं विभावसुम्- यज्ञानां केतुं

मीमहे ऋ॰ अ॰ ६ अध्या॰ ३ व॰ ३७ मं॰ ८ अनद्रुह॰ ४४ मं॰ ९-१० अनयोर्मन्त्रयोश्चित्र
भानु विभावसु धूमकेत्वादि विशेषण विशिष्टत्वेनाग्नेर्देवताया एव सुखसम्वेद्यत्वा
च्चेति ×२×

३५ अग्नेयं यज्ञमध्वरं विश्वतः परिभूरसि - स इद्देवे
षु गच्छति ४ ॥ अस्यार्थः हे अग्ने त्वं यं यज्ञं विश्व
तः सर्वासु दिक्षु परिभूः परितो व्याप्तवानसि स इत्
स एव यज्ञो देवेषु नृन् प्रापयितुं स्वर्गं गच्छति प्रा
च्यादि चतुर्दिग्गतेष्वाहवनीय मार्जालीय गार्हपत्या
ग्नीध्रीयस्थानेष्वग्निरस्ति परिशब्देन होत्रीयादि
धिष्ण्येष्वाग्निर्विवक्षिता कौ·य· अध्वरम् अग्नि
नाः सर्वतः पालितत्वाद्राक्षसादिभिर्हिंसितुमशक्य
मिति ॥ अत्र दयानन्दः हे अनन्तशक्ते परमात्मन्न
ग्ने त्वं सर्वतो व्याप्तः सन् यं यज्ञं जगद्रूपं वा अ
ग्निहोत्राद्यश्वमेधपर्य्यन्तं यज्ञं नयाभवन्नुति प्रार्थनो
पासनारूपं च त्वमेव पालितवानसि स एव य
ज्ञः परिपूर्णः सन्निष्टफलदायको भवति अ
स्य यज्ञस्यानुष्ठानर्जनस्य त्वमेव रक्षकोऽसि सः
तस्मात्समनुष्यः देवेषु विद्यादिदिव्यगुणेषु
विद्वत्सु वा प्रवर्त्तमानः सन् इत्थं सुखेनैव ग
च्छति परमानन्दं प्राप्नोति नचान्यश्चेति इ
त्र अत्र निरुक्त्यार्थोऽस्ति इति व्याचष्टे ॥ तन्न

23

यत्तशब्दस्यजगतिशक्तेर्निरुक्तकारादिभिरप्रति
पादनात् मरवनामसुपठितत्वाच्च ॥ किंचात्र
यंबृष्टव्यः जगदुपयज्ञस्यपरिपूर्त्तिः कीदृशीक
दाचसम्पद्यते तत्परिपूर्तौ कीदृशंफलंदृद
ति जगदुपयज्ञानुष्ठानावकः तस्यचकर्त्तकः
कौस्ति [illegible] कियत्नस्य येष्ठजगद्
पयज्ञानुष्ठानाप्रवर्त्तमानः सुखेनपरमान
न्दंप्राप्नोति गणागणितिप्रवर्त्तते विद्यादि दव्यत्ताx
दिव्यगुणोयुकचमाधारधैर्यमौनेन तयज्ञ
कर्त्तुःप्रवृत्तिः यंयज्ञंपरिभूरसीतिवाक्ये त्वंय
यज्ञंपालितवानसीतिव्याख्याय सरावयज्ञःप
रिपूर्त्तिः सन्निष्ठफलदायकोभवतीतिकुतोऽस्त वाक्यंते नx
ध्यम् जस्ययज्ञस्यानुष्ठानुजीतस्यभवानेवक
दकोस्ति इत्ययमर्थः कुतः समागतः सुखेन
परमानन्दंप्राप्नोतीत्यनेनचकुतः कृपयामाग स
मनंकृतम् देवशब्दस्यादिव्यगुणार्थकत्ववि
इदर्शकत्वंचकिंप्रमाणकमिति ममतुजग
दूपयज्ञानुष्ठानेप्रारादन्यःकोपिनास्तीति

३६

नचयज्ञशब्दस्यजगतिशक्तिर्यज्ञाभ्यासनदिव्यदृष्टे
तिवाच्यम् युगपद्वृत्तिद्वयाभ्युपगमात्मकदो
षग्रस्तत्वात् संभवतिनच्छन्दस्ययज्ञेनसाकंस
वंधेनदक्षयामनुष्यसम्बद्धत्वकल्पनायांवी
जाभावाच्चेति द्वितीयोर्थस्तुसर्वथानन्वितःपुन
रुक्तिग्रस्तश्चपूर्वोक्तदोषगणाभिभूतश्चोपेक्ष
ष्यते-

अग्निर्होताकविक्रतुःसत्यश्चित्रश्रवस्तमः-देवो
देवेभिरागमत् ५ अस्यार्थः अयमग्निर्होताज
गन्निष्पादकः कविक्रतुःकान्तप्रज्ञःकान्तक
र्मावा कविशब्दःकान्तवचनःकान्तदर्शनोभवती
त्यादिनिरुक्तात् क्रतुरितिप्रज्ञायाःकर्मणोवाना
मनिघण्टौ सत्यःफलावश्यप्रदाता अतिचित्रकी
र्तियुतः देवैर्दिव्यैर्गुणिभिःसहास्मिन्व्यवहारेसमा
गच्छत्विति यत्तुकविशब्दंक्रान्तदर्शनइतिक्रतुंजग
त्कर्मेतिविवृणोतितन्निरुक्तविरुद्धत्वादुपेक्ष्य
म् यत्तुदेवोभिःसर्वज्ञपरमात्मनैवादिगुणैःसहास्मा
कंहृदयेऽस्मिन्संसारेचप्रकाशमागच्छत्विति त

३६

दथुक्तम् सर्वज्ञस्यगुणत्वाभावात् ईश्वरस्य सर्वदा
तत्तद्गुणयुक्तत्वेन तत्प्राप्तिसंभावनायाश्च सत्त्वेन
देवेभिरित्यस्यानर्थक्याच्च यस्य यद्विरहे विप्राधा
न्येन क्रियान्वयित्वं संभाव्यते नास्मिन्नेव सहयुक्तेऽ
प्रधाने इति सूत्रेणातिलैः सह माषान्वपतीत्यादौ
तृतीयाविधानेनानन्त्यादिगुणानां तद्विरहेतरस्मा
वेन सहयोगे देवेभिरितितृतीयाँश्चाप्यसाधुत्वा या
च्चेतिदिक् द्वितीयोऽर्थीनन्वितः पूर्ववत्
यदङ्ग दाशुषेत्वमग्ने भद्रं करिष्यसि - तवेत्तत्स
त्यमङ्गिरः ६ अस्यार्थः अङ्ग हे अग्ने दाशुषे त
विर्दत्तवते यजमानाय यद्भद्रं वित्तगृहपशुप्रजा
रूपं करिष्यसि तत्तवेत् तवैव सुखहेतुरिति शे
षः हे अङ्गिरोऽग्ने तत्वसत्यं यजमानस्य वित्तादि
सम्पत्तौ सत्यामुत्तरकालानुष्ठानेनाग्नेरेव सुखं
भवतीति अङ्गिरः अङ्गिरा अङ्गारा इतियास्कः
ऐतरेयिणोऽपि समामनन्ति प्रजापतिदुहितृध्या
नोपाख्याने येऽङ्गारा आसंस्तेऽङ्गिरसोऽभव
न्निति तस्मादङ्गिरो नाम कर्मनिकारणत्वाद

२८ ग्नारूपस्याग्नेरङ्गिरस्त्वम् इति
यजुर्दया० प्राणानां रसभूतेन परमेश्वरेति अङ्गिरः
शब्दस्यार्थं ब्रवीति तस्मात् मादिकम् पूर्वोक्तनिरुक्त
विरुद्धत्वात् अङ्गिरसो अङ्गानां हि रसः - प्राणो
वा अङ्गानां हि रसः श० कां० १४ अ० ४ इति शतपथ
वाक्यस्याङ्गिरसशब्दार्थबोधकत्वात् न तत्राङ्गि
रसशब्दोऽपि त्वङ्गिरइति अपि चात्र शतपथवाक्ये
प्राणानामङ्गरसत्वेनाभिधानात् प्राणो वा अङ्गिराः
श० कां० ६ अ० ८ इति शतपथगतवचनानुकूल्येनाङ्गि
रःशब्दस्य प्राणार्थकत्वेऽपि प्राणानां रसभूते परमे
श्वरेत्यात्मकार्थस्य सर्वथा भ्रान्तिमूलकत्वमेव
किञ्च अङ्गानां पृथिव्यादीनां सारभूतोऽन्तर्यामी परमेश्व
रः सर्वस्य प्राणभूतत्वाद् रसोऽस्तीति बोध्यम्। अनेन
वाक्येन प्राणरूपत्वमीश्वरस्य वदतस्तस्य तत्र प्राणा
नां रसरूपतया प्रतिपादनं पूर्वापरविरुद्धतयोपे
क्ष्यमेव प्राणानां जडत्वेन तस्यापि जडत्वापत्तेश्च रस
रूपत्वेन रसस्याधेयगुणत्वेन तस्य सर्वाधारत्वा
नुपपत्तेश्चेति भावार्थो विज्ञेयः प्राणानां प्राणाङ्गत्व
र्थस्य संस्कृतवाक्युक्तार्थादनुपपन्नत्वात् इति- २८

यत्तु भट्टभाष्ये न परमात्मस्वरूपमोहरूपमुक्तमत्राभि
धीयत इति प्रमाणत्वेन निरुक्तमिमं भद्रं भगेन व्या
ख्यातं भजनीयं भूतानामभिद्रवणीयं भवद्रमयती
ति वेति पठति तन्मन्दम् निरुक्तस्य विज्ञातेरूपैर्थ
तात्पर्यग्राहकत्वात् यद्वैकृतस्य वित्तं तद्रूढं ता
भद्रं भजनाम भद्रं प्रज्ञावो भद्रमिति शाक्यायतिश्चाल,
तो भद्रशब्दार्थस्य समाम्नातात्वेति तथ्यात्वास्य भागस्य
सर्वोमभागत्वेनमीहृद्वार्थ
मायाकृतग्रंथविरोधः ॥
उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् - नमो भ
रन्त एमसि ७ अस्याभिप्रायः हे अग्ने वयमनुष्ठा
तारः प्रतिदिनं दोषावस्तः रात्रावहनि च धिया बुद्ध्या
नमो भरन्तः नमस्कारं सम्पादयन्तः उप समीपे
त्वा त्वामसि त्वामभिगच्छामह इति ॥ यत्तु दर्भोति
कामेरनायासेन होममात्रेणाप्तत्वान्नमस्करणीयामा
वाक्यमाधवाचार्यादिव्याख्यानमनन्यथेति वदति ॥ न
न्ते अभिमानिव्यपदेशात्तिति सूत्रानुरोधेनाग्न्य
धिष्ठातृदेवताया नमस्कार्यत्वात्प्राप्तत्वाच्च ईश्वर
वाचकत्वे बहुश्रुतिनिरुक्तादिविरोधस्यास्माभिः
पूर्वं प्रदर्शितत्वाच्च ॥ यत्तु द्वितीयेपि वायुरेद्धिक
रं यज्ञानुष्ठानं शिल्पविद्यामयं च वायुयाम इति कथय
ति ॥ तन्मन्दम् देवताप्रसादद्वारकं स्वर्गफलकं यज्ञा

दिकर्मप्रतिपादकानां स्वर्गकामो यजेतेत्यादिवाक्यानां
३८ वैयर्थ्यापत्तेः अत्रेदं प्रत्युच्यते होमोस्य धूममात्रेण
वाय्वादिशुद्धिरूपं तत्साक्षान्माक्षे नविहितप्रणीताप्रो
क्षणीपात्रवृक्षस्थापनादिसहितेन वा नार्थः य
त्र कुत्रापि घृतादिहोमेन वाय्वादिशुद्धौ होमप्रक्रि
याया वैयर्थ्यापत्तेः वाय्वादिशुद्धिरूपफलस्याकी
द्विपदा४ र्तनेन स्वर्गकामो नामानर्थक्यात् न द्वितीयः
तादृशवाक्यानुपलम्भात् तीर्थकृत्वागतागतस्य
तस्य वाय्वादिशुद्ध्याफलाभावेनाकृतहोमस्यन
तीर्थप्रदेशप्राप्तौ न स्फलावाप्तेरिति कृतनाशा
कृताभ्यागमप्रसङ्गात् होमकर्त्तुः किञ्चित्कालि
कफलाद्यधिकरणत्वेऽहव्यं ह वै चातुर्मास्यया
जिनः सुकृतं भवतीत्यादिश्रुतीनामानर्थक्यापत्ते
श्च न च जगदुपकारकवाय्वादिशोधकहोमकर्म
णा होतुः स्वर्गादिप्राप्तिर्भवतीति वाच्यम् इन्द्रादिदे
वताह्वानतस्तुजनसोमयज्ञपानादिजन्यतत्प्रसाद
१वा त्रि४ द्वारकस्वर्गादिफलबोधकानां तत्प्ररावेन सिद्धेः प्र
जया पशुभिः समर्ध्यतीत्यादिवाक्यानामनर्थक्या
पत्तेः तस्मादुपहासास्पदमनधीतवेदस्यैतद्वच
नमिति अधिकमग्रे वक्ष्यते - द्वितीयार्थस्य मन्त्र ३८

स्यपदैरत्नाभात्सर्वथासहेयरावेति ७ ||

राजन्तमध्वराणांगोपामृतस्यदीदिविम् - वर्द्धमानंस्वेदमे ८ अस्यार्थः पूर्वमन्त्रोक्ताग्नेर्विशेषणानि राजन्तम् दीप्यमानम् - अध्वराणां राक्षसकृतहिंसारहितानां यज्ञानां गोपां रक्षकम् - ऋतस्य सत्यस्याव इपम्नाविनः फलस्य दीदिविम् पौनःपुन्येन प्रद्योतकम् - आहुत्याधारमग्निं हुत्वा शालास्वसिद्धकर्मफलं स्पर्धते स्वेदमे स्वकीयगृहे यज्ञशालायां वर्द्धमानम् इति || यत्तु अस्मिन्नेव जन्मनि भवत्कृपयास्माकं मोक्षो निश्चितो भवेदिति नित्यमिच्छामहे इति || वदति तन्न कर्मकाण्डभागे त्वैहिकपदार्थप्राप्तये ईश्वरः प्रार्थ्यते निष्कामभागे तु तत्प्राप्तये इति तदुत्तरग्रन्थविरोधात् ||

सनःपितेवसूनवेसूपायनोभव - सचस्वानःस्वस्तये ९ सूपायनः शोभनप्राप्तियुक्तो भव - नः अस्माकं स्वस्तये सचस्व समवेतो भव - शेषं स्पष्टम् - इत्यग्निसूक्तं नवर्चम् - - || अथ वायुसूक्तं नवर्चम् ||

वायवायाहिदर्शतेमेसोमाअरंकृताः - तेषांपाहिश्रुधीहवम् १ हे दर्शत दर्शनीय वायो कर्मण्येतस्मिन् आयाहि आगच्छ त्वदर्थमिमे सो

३९ माः अरंकृताः अलंकृताः तेषां तान् पाहि पिब तथा
नार्थं मस्मदीयमाह्वानं श्रुधि शृणु इति अथ यास्कः
मे वायवायाहि दर्शनीयेमे सोमा अरंकृता अलंकृता
स्तेषां पिब शृणु नो ह्वानमिति ॥ दयानन्दकृत हे वायो
अनंतबल सर्वप्राण अन्तर्यामिन् दर्शनप्रेक्षणीय अ
स्मद्धृदये आगच्छ नित्यं प्रकाशको भव इमे सोमाः
सर्वे पदार्था भवतैव भूषिताः तान् त्वमेव पाहि रक्ष
तथा एवं स्तुतिं सद्यो नितरामव वायुः परमेश्वर नामे
त्येवं व्याचष्टे ॥ तन्न ईश्वरस्य मनोवागगोचरत्वेन प्रे
क्षणीयत्वाभावात् दृश्यत्वे घटादिवदनित्यत्वापत्तेश्च
आयाहीत्यस्य नित्यं प्रकाशको भवेत्यर्थकत्वे प्रमाणा
भावाच्च सोमशब्दस्य पदार्थमात्रवाचकत्वाभावाच्च
पाहीत्यस्य रक्षेति हवमित्यस्य स्तुतिमिति विवृते र्निरु
क्तविरुद्धत्वाच्च न च नमो ब्रह्मणे नमस्ते वायो त्व
मेव प्रत्यक्षं ब्रह्मासीति तैत्तिरीयोपनिषदि वायु
पदेन स्पष्टं ब्रह्मणो ग्रहणमस्तीति वक्तव्यम् वा
योरेव तत्र ब्रह्मत्वप्रतिपादनात् अत एव तत्र
वायुमहिमप्रपञ्चमेव प्र. त्यक्षं ब्रह्मासीत्युक्तं ब्राह्म
णस्तत्तद्देवतारूपत्वं प्रतिपादितमेवैवं सर्वश्रुत्यनु रश्मिभिः
रोधादित्यलम् ॥ द्वितीये र्थे भौतिक वायुगुणकीर्त्त ३२

थम

नमस्तङ्गं प्र मन्त्रोक्तयुक्तिसमूहावलोकनात्
अचेतनेनवायोऽर्थायाहि अधिपा ऽहीति पदत्र
तिपादितागमनत्र्यवस्थापानरहणात्मकक्रिया
विषयकसार्थनायाऽऽप्रन्वयान हित्वा नचयेन
सर्वेजीवाः अरणवन्तिसचमावयति विद्योपदेशा
र्थं यदास्वानंभवति तत्राचेतनेचेतनव्यवहा
रेन दोषो भवतीति द्वयोन्नेकधनपुनन्तरत्ति वा
च्यम् अन्तहिते खिलोवेदस्यकतारकत्वापत्तम्
अभमानिव्यपदेशात्यितिसूत्रैरीतित्वाच्चचे
तनाचेतनव्यवहारोऽन्येदापत्ते ॥

ततत्रीय शात्तद्दे वनानात्र हरणमिति

यस्य भूमिः प्रमान्तरिक्षमुतोदरम्- दिवं यश्चक्रे मू
र्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः १ यस्य सूर्यश्चक्षु
श्चन्द्रमाश्च पुनर्णवः - अग्निं यश्चक्र आस्यं तस्मै.
२ यस्य वातः प्राणापानौ चक्षुरङ्गिरसोऽभवन् - दि
शो यश्चक्रे प्रज्ञानीस्तस्मै. ३ अ. पर्व. सं. कां१०
एषु मन्त्रेषु परमात्मनो विराड्रूपस्य वर्णनम् -
यद्द्यानेदः यस्य भूमिः पादो विवास्ते एवमन्यापि
इवस्य सर्वत्राध्यारोपं करोति तत्तद्वक्तव्यम् परमा
त्मनो मायिकरूपस्य विराजस्तेषां तेषां तदङ्गत्वे
दोषाभावात् इत्युपेयानदेहेन श्रीभगवता कृष्णेना

मायिक

४०

यं विप्रसहस्रेणोक्तेनापि विप्रदर्शितः स्पष्टं चैतद्भगव
द्गीतायाम् ॥ अन्यत्र च निरुक्तकारेणाप्युक्तो
क्तम् अ॰ ७ खं॰ ४ एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गा
नि भवन्तीति

यज्ञात्मा देवतास्त इति य॰ अ॰ २५ मं॰ १३ द्यौः शान्तिरन्तरि
क्षं शान्तिरिति य॰ अ॰ ३६ मं॰ १७ मन्त्रयोर्देवपदस्य
विद्वत्परतां वदति यत्तदासङ्कल्पितम् अर्कोक्तेः
विदुषां पूर्वकरत्वाभावाच्च देवविशेषनामसु
विश्वेदेवाः साध्या इति पठितत्वाच्च

निमील इति मन्त्रे ×

यज्ञेतस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे इति पुरुष
सूक्तमन्त्रव्याख्यायां सर्वैर्मनुष्यैर्ग्रहीतुं योग्या इत्यर्थं
कल्पयित्वा सर्वहुत इति वेदानामपि विशेषणं भवि
तुमर्हतीति व्याचष्टे तदयुक्तम् शूद्रो यज्ञेऽनव

प्रलावं ×

क्लृप्त इति सावित्री यजुर्लक्ष्मीस्त्रीशूद्रासु नेत्यनी
ति श्रुतिभ्यां तं होवाच किं गोत्रो नु सोम्यासीति छान्दो
ग्योपनिषदि प्र॰ ४ उपनयनार्थिनं जाबालं प्रति गो

च

त्रविषयकप्रश्न स्मरणात्त्रैवर्णिकातिरिक्तस्यो
पनयनानधिकारित्वेनोपनीतस्यैव वेदग्रहणा
धिकारितया वेदानां सर्वमनुष्यग्राह्यत्वाभावात्
तेनैरादानेर्थे प्रतिषेधप्रयुक्तत्वाच्च शूद्रादीनामि

४२

यत्तुब्रह्मदिवसप्रारम्भाद्वेदोत्पत्तिः कथ्यन्तावेदोत्प
त्तेर्वर्षाणि संख्यातानि १९६०८५२९७६ चैतानि इ
ति तदपि न मनोहरम् द्विपरार्द्धमितवर्षायुषो हिर
ण्यगर्भस्य पूर्वपरार्द्धनिक्रमणोत्तरमादिदिवस
द्वितीयपरार्द्धस्य सम्प्रति विद्यमानत्वेन देतं दिने
प्रलये जगतो विनाशे पिवृत्तौ विद्यमानत्वेन त
त्रवेदस्थितेरपि वक्तुं शक्यतया वेदतिरोभावाभा
वेन तत्रवेदोत्पत्तिः दर्शगणनयोरयुक्तत्वात् तद्ब्रह्म
जन्मदिनात्प्रगणनाया उचितत्वात् - यद्यपि वेद
नामीश्वरप्रणीतत्वे नित्यत्वं चास्माकं नयेस्ति श्रुतिस्मृ
तिपुराणेतिहासयुक्तिसिद्धं तथापि दयानन्दस० प्र
णीतयुक्तौ नित्यत्वमीश्वरोक्तत्वं च न घटत इति तत्र
दर्श्यते - यत्तु ईश्वरप्रणीतत्वाद्वेदानां नित्यत्वं तस्य
सर्वसामर्थ्यस्य नित्यत्वात् इति तन्न सृष्टौ जग
तोपि तथाविधत्वापत्तेः वाचारम्भणं विका
रो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः कार
णनित्यत्वस्य कार्यनित्यत्वाप्रयोजकत्वात् नच का
र्यरूपशब्दस्यानित्यत्वेपि परमात्मज्ञानस्य कार्यस
म्बन्धस्य नित्यत्वमेव भवितुमर्हति तस्य ज्ञानक्रिययोः स
भावसिद्धयोरनादिनोर्नित्यत्वेन त सर्वसामर्थ्यस्य नि

म

त्यलौकिकत्व

४२

स्यतयान द्विधामयवेदानामपि सूर्याचंद्रमसौ धाताय
थापूर्वमकल्पयदिश्रुत्या सूर्यचन्द्रादिरचनात्स्वज्ञा
नमध्ये पूर्वकल्पेयथासीत्तथास्मिन्कल्पेपिकृतेतित
द्वेदानामपितज्ज्ञानमध्येस्थितत्वात्तेषांनित्यत्वमि
तिवाच्यम् दृष्टान्तवैषम्यात् सार्वज्ञ्यमङ्गाभियासर्वस्य
नित्यानित्यस्यतज्ज्ञानविषयत्वेनसूर्यादीनामपित
ज्ज्ञेयत्वेऽनित्यत्वेनवेदानामप्यनित्यत्वापातात्
नहिघटोत्पत्तेःपूर्वंघटस्यकुलालबुद्धिस्थत्वेपिनि
त्यत्वंसम्भवति किंचवेदानित्याईश्वरेप्रलयेकार्य
रूपतयातिष्ठन्तिकारणरूपतयावा नाद्यःवर्णस
ङ्घातरूपस्यतस्यतत्रनिष्पन्नतयावस्थितेरभावात् न
द्वितीयःसर्वस्यैवकार्यजातस्यविनाशेकारणेवस्थि
तौतस्यापीश्वरीयकण्ठताल्वाद्यभिघातरूपेणवास्थि कारणे
तेःकल्पतेपिपरमात्माऽशरीरीतिभवत्सिद्धान्तभङ्गा
पत्तेर्मूषिकभियास्वगृहंदग्धमितिन्यायस्यावका
शात् नचनहिमयाकण्ठताल्वाद्यभिघातेनेश्वरेऽस्थि व
तिःकल्प्यतेऽपितुज्ञानमध्येइतिवाच्यम् विकल्पास
हत्वात् तथाहि किंवेदाःप्रलयेईश्वरीयज्ञानमध्ये
शब्दरूपेणस्थितास्तदर्थज्ञानरूपेणवास्थिताऽऽद्य
होस्थित् तदर्थरूपेणवा आद्ये ज्ञानरूपेणशब्द

सिद्धि× त्वंकल्प नायाग्र वस्यक

ए

४२

स्यगुणस्यावस्थानं कल्पयितुमशक्यम् गुणेगुणा
नङ्गीकारात् द्वितीये वेदार्थज्ञानस्य स्मृत्यात्मकस्ये
श्वरीयज्ञानाधारकत्वेनङ्गीकारे द्वयोर्गुणत्वात्
पूर्वज्ञानस्याधारस्य ज्ञानत्वापत्तेश्च तृतीये वेदा
र्थस्य मुख्यतयेश्वरात्मकत्वेन ज्ञानमीश्वरेतिष्ठती
श्वरो ज्ञाने इत्यन्योन्याश्रयोऽभेदे भेदेतु ईश्वरे द्वैता
पत्तिरिति ॥

यत्तु नित्याः शब्दा नित्येषु शब्देषु कूटस्थैरविचालिभि
र्वर्णैर्भवितव्यमनपायोपजनविकारिभिरिति महा
भाष्यस्य पतञ्जलिवचनात् सर्वे सर्वपदादेशाः इति
दाधाघ्वदाविति सूत्रस्य महाभाष्याच्च श्रोत्रोपल
ब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः
शब्द इति अइउण् सूत्रस्य भाष्याच्च एकैकवर्णवर्तिनी
वागिति महाभाष्यप्रामाण्यात् प्रतिवर्णवाक्रियायाश्च
नित्यत्वं न शब्दस्य यथा गोरित्युक्ते यावद्गकारे स्तिन
तावदौकारे यावदौकारे न तावद्विसर्ग इति एवं च वाक्रि
योच्चारणस्यापायोपजनौ नाम तौ पा[illegible]गमौ भव

९४ तो नाखण्डैकरसस्य शब्दस्येति अत्र गगनाकाशवन्नि
त्यनित्यः नित्यस्तु स्याद्दर्शनस्य परार्थत्वादिति जैमिनि
सूत्रात् उच्चारणस्यार्थज्ञापनार्थत्वात् सोयं गकार इति
प्रत्यभिज्ञानाच्च शब्दस्य नित्यतांवदन्ति तन्न सर्वस्ये

नान्येषां

वशब्दस्य वैयाकरणा जैमिनिमतयोर्नित्यत्वे ईश्व
रज्ञानत्वाद्वेदानां नित्यत्वमिति तत्रो व्याह
तत्वात् वर्णानां नित्यत्वेऽपि तत्तदानुपूर्व्या अनित्य
त्वाच्च यत्तु तद्वचनादाम्नायस्य प्रामाण्यमिति वै
क शेषिकशास्त्रे कणादमुनिवचनात् मन्त्रायुर्वेद
प्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यादिति गो
तमस्य न्यायशास्त्रे अ० २ पा० १ सू० ६७ द्रष्टव्यं सामान्या
च्चानुमानमिति तत्रैव वात्स्यायनवचनाच्च
पातञ्जले च शास्त्रे पतञ्जलिना स एष पूर्वेषामपि
गुरुः कालेनानवच्छेदादिति सूत्रितत्वाच्चेति
जगत्समभिव्यक्तेः स्वतः प्रामाण्यमिति कापिल
अ० ५ शास्त्रे सू० ५१ च शास्त्रयोनित्वात् अ० १ पा० १ सू० ३
दिति बादरायणसूत्राच्च अत एव च नित्यत्वम्
अ० १ पा० ३ सू० २९ इति भगवद्व्याससूत्राच्च सूर्यवत्
स्वप्रकाशत्वेन परप्रकाशकत्वं वेदानां नित्यत्वं
चावगम्यत इति वदति सपर्यगाच्छुक्रमकायम
व्रणमस्नाविरं शुद्धमपापविद्धम्- कविर्मनी
षी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधा
च्छाश्वतीभ्यः समाभ्य इति य० अ० ४० मं० ८ इत्या वा

अ० १ पा० १
सू० २६

४३

स्योपनिषज्जतमन्त्राद्यनित्यत्वमितिकथयति तन्न
वेदविरुद्धस्यसर्वस्याप्रमाणत्वेनवेदस्येश्वरप्रणीत
त्वप्रमाणात्वनित्यत्वसाधनेवेदमूलकप्रामाण्य
स्या वर्त्तांतेषामेवप्रामाण्यं निश्चितैतैस्तत्साधनस्या
नुचितत्वात् वेदवाक्यैरेवतत्साधनेऽप्रामाण्याङ्क्या
श्च सर्वशास्त्राणांभवत्कल्पितार्थकवेदविरुद्ध
त्वेनतत्प्रमाणोपन्यसनस्यसंभवनात्सर्वेश्वरकर्तृ
मयुक्तत्वाच्च ॥ यत्त्वीश्वरकर्तृकोपदेशाध्या
पनाभ्यांविनानकस्यचिदपिविद्यायाउद्भव
ः स्यादिति तन्नयुज्यते अशरीरेणतेनोपदे
शाध्यापनयोरसंभवात् सशरीरस्यभवन्मतेऽ
स्वीकाराच्च यदीश्वरस्यात्मभ्रमुद्धिप्रेरकत्वेनतद
ध्यापकत्वमङ्गीक्रियतेतदातादृशज्ञानविशिष्टसे
मित्येव वात्मभ्रवस्तेनोत्पादनेस्वीकार्यंलाघवात् अध्या
पनाङ्गीकारश्चेत्तदादिव्यशरीरावच्छिन्नईश्वरो
ऽध्यापयितास्वीकार्यइति ॥

॥ यत्तुनित्यस्यनामगणकर्मण्यपिनित्यानिभवन्ति
तदाधारस्यनित्यत्वान्नैवाधिष्ठानमन्तराना
मगणकर्मादयोगुणाः स्थितिंलभन्ते तेषांच

39

राश्रितत्वात् यन्नित्यं नाश्रितन्तस्यैतान्यपि नित्या
नीति तन्न नामगुणकर्मविशिष्टवस्तुनो नामा
द्याश्रयत्वेन घटवदनित्यत्वात् अतएव ब्रह्म
णो नामरूपादिकं निर्गुणं निःक्रियं शान्तमिति
साक्षी चेता केवलो निर्गुणश्चेति अस्थूलमन
णवह्रस्वमदीर्घमित्यादिश्रुतिभिः प्रतिषिध्यत
स्यानामगुणकर्मत्वेन नित्यत्वं साधितम् सम्ब
न्धसामान्यश्चान्यस्य ब्रह्मणः सम्बन्धसामान्यान्त
र्गतशब्दविशेषवाच्यतारूपसम्बन्धस्याप्ययो
एवं× गात् आधाराधेयभावस्यापि नामादीनां नित्य
त्वे द्वैतापत्त्यारकोदेव इति द्वितीयाद्भयम्भव
तीति श्रुतिप्रतिपादितैकत्वाभयत्वादिभङ्गाप
त्तेश्च दिव्यशरीरावच्छिन्नस्य मातृयादिशरीराव
च च्छिन्नस्य मायोपाधिकस्य कल्पितनामरूपाद्या
श्रयत्वेपि निरवच्छिन्नस्य नामगुणक्रियाशून्य
त्वस्य वेदेन तत्र तत्र स्पष्टं प्रतिपादनाच्च वेदस्य ज
न्यत्वं सर्वज्ञस्यानस्य नित्यत्वापादनमपि न सं
गच्छते जन्यस्य घटादिवदनित्यत्वात् द्वैतापा
तनाच्च तार्किकैरपि सत्यपरमाणुरूपन्नामजगतो

४०

ति आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि
जीवन्ति आनन्दो ब्रह्मेति व्यजानात्-को ह्येवान्यात्कः प्राण्याद्य
देष आकाश आनन्दो न स्यात्-एतस्यैवानन्दस्यान्यानि भू ता
निमात्रा मुपजीव न्ती ४९
४४ ऽनित्यत्वस्यैवाभ्युपगमाच्च तन्न ये नित्यस्याप्या
काशस्य गुणः शब्दो नित्यतयैव स्वीकृतः वैदिकैः
श्रीमगवत्पूज्यपादैः शङ्कराचार्यादिभिः सततम
न्तस्य जगतोऽसत्त्वमेव प्रतिपादितम् नेह नाना
स्ति किञ्चन वाचारम्भणं विकारो नामधेयं मृत्ति
त्यमि केत्येव सत्यादिकाः श्रुतयोऽपि जगतोऽनित्यत्वेप्र
माणम् नचेश्वरस्य ज्ञानानन्दाद्यनधिष्ठानत्वे
नत्व दुःखित्वाद्यापत्तिरिति वाच्यम् नित्यविज्ञा
नमानन्दं ब्रह्मेति सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतिभि
सन् स्तस्य ज्ञानानन्दस्वरूपत्व [illegible] प्रतिपादनात्
यत्तु नित्यं स्यिचोत्पत्ति विनाशाभ्यामितरद्भवितुम
र्हति उत्पत्तिर्हि पृथग्भूतानां द्रव्याणां संयोगविशे
षाद्भवति तेषामुत्पन्नानां कार्यद्रव्याणां सति वि
योगे विनाशश्च संघाताभावात् अदर्शनं च विना
शः ईश्वरस्यैकरसत्वान्नैव तस्य संयोगवियोगा
भ्यां संस्पर्शोऽपि भवतीति तदयुक्तम् उत्पत्तिवि
नाशव्या कियार्था [illegible] नित्यस्यवाऽनित्यस्य
मन्त्रो भवति तास्त्रिविधा ऋचः प्रत्यक्षकृता आ
ध्यात्मिक्यश्च नि० अ० ७ खं० १ इति निरुक्तं स्वक
ल्पितार्थे प्रमाणयति तद्भ्रान्तिमूलकम् म
न्त्रस्तुत्याया देवतायाः स्पष्टं मन्त्रतो भिन्नत्वेनात्र
प्रतीयमानत्वात् कथमन्यथा प्राधान्यस्तुती
नां देवतानामिति यस्यां देवतायामार्थपत्यमि
उ. च्छन्स्तुतिं प्रयुङ्क्त इति च । तद्दैवतः स मन्त्र इति
च निरुक्तकारो वदेत् स्तुतिस्तुत्ययोर्भेदात्
।। यद्वा० तद्येनादिष्टं देवतामन्त्रास्तेषु देवतोपप
रीक्षा यद्देवतः स यज्ञो यज्ञाङ्गं वा तद्देवता भव
न्त्यथान्यत्र यज्ञात्प्राजापत्या इति याज्ञिका ना
राशंसा इति नैरुक्ता अपि वा सा कामदेवता ५४

उ. परोक्षकृता ×

स्यात्त्रायोदेवता आस्ति सा चारो वक्तृत्वं लोके देवदे
वत्यमतिथिदेवत्यं पितृदेवत्यं यात्रदेवतो मन्त्र
इति नि॰ अ॰ ७ खं॰ ४ निरुक्तस्योक्तार्थप्रमाणत्वे
नोपनिबध्नाति तदपि नास्माकं प्रतिकूलम्
तदीय व्याख्याने तु यत्र न देवता दर्शनं नो मार्थो
वायेर्बुद्ध्यते तत्र यज्ञो देवता यज्ञाङ्गं वेत्येतद्देव
तारूपमिति विज्ञायते तत्तुच्छम् यद्देवतः स यज्ञ
इति निरुक्तस्य यद्देवताकः स यज्ञ इत्यर्थः यस्या
देवताया ऋच्यादिनास्मिन्यज्ञे यज्ञाङ्गे वाभवति
तद्देवताकास्ते मन्त्रा इति स्पष्टमुपलभ्यमानत्वा
त् अतो बुद्धिवलं यडितं मन्यस्य यतः सुबोध
मपि दुर्बोधं तस्य अनादिष्टदेवता इत्यस्य यत्र
देवता दर्शनं नेति नार्थः दिशो रुच्चारणार्थत्वेन
तूच्चारितदेवताका मन्त्रा इत्यर्थ एव तस्य साधुत्वा
त् तस्मात्तेयज्ञादन्यत्र प्राजापत्या इत्यत्रापि मन्त्रस्ये
वेश्वररूपत्वं कृतो न ईश्वरस्यापि तत्र प्रत्यक्षतोऽप्र
तीयमानत्वात् वस्तुतस्तु यत्र देवतोच्चारणं न तत्र
व्रतैवद्देवता प्रजापतिशब्दस्य चतुर्मुखे प्रसिद्ध
त्वात् देवदेवत्यमिति निरुक्तस्य विधद्देवत्यमि
ति पितृदेवत्यमित्यस्य मातृपितृदेवत्यमिति व्या

ख्यानं तु मत्तप्रलापः मृतानां पितॄणां सपत्नीकानां
पितृश्राद्धेनोपादेयत्वाभावान्मृतायाः पृथग्ग्रहण
स्यानर्थकत्वात् ये समानाः समनस इत्यादिषु बहु
षु मन्त्रेषु मृतश्राद्धपितॄणामेव श्राद्धदेवतात्वेनाभि
धानात् तत्तन्मन्त्राग्निष्वात्तादिदिव्यपितॄणामा
वाहनपूजनादेः श्राद्धे विधानात् आयन्तु नः पि
तर इत्यादिमन्त्रैरिति देवशब्दस्य विद्वदर्थकत्वा
भावस्य पूर्वमस्माभिरुपपादितत्वेनेन्द्रादिदेवता
वाचकत्वाच्चेति मन्त्रास्तु यज्ञसिद्धये स्वतन्त्रमस्व
हेतुत्वाद्यास्तु देवता एव सन्तीति निश्चीयत इति
यत्तदसमञ्जसम् यजनीयस्य देवस्याग्न्यादेः
सम्प्रदानत्वेन प्रसाद्यत्वेन फलप्रदत्वेन च मुख्य
त्वात् मन्त्राणां स्तुतिरूपत्वेनाचेतनत्वेन च स्तुत्या
याश्चेतनाया अग्न्यादेरेव देवतायाः प्रसादसाध
नत्वात् एतेन मन्त्रा ईश्वराज्ञानराशयो यज्ञाङ्गं प्र
जापतिः परमेश्वरः कामो विद्वान् अतिथिर्मातापि
ताचार्य्यश्चेति कर्मकाण्डीनामप्येता देवताः सन्तीति
परिगणनम् मन्त्रेश्वरावेव याज्ञदेवते भवत इति
परास्तम् नैगमार्थविरुद्धत्वात् यत्तु देवो दाना
द्दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा नि॰

अ॰८ खं॰५५ मन्त्रामननात् छन्दांसि छादनादिति एतेनि
रुक्तं पठित्वा अस्यार्थं करोति अत्र मनशब्देन स्वरो
विद्वांसो मनुष्याश्च देवतासंज्ञाः सन्ति तानेव स्वस्व
त्वनिरुक्तिपूर्वकं परत्वोत्पादनमिति दीपनास्यै
दयः उपदेशाद्यर्थकात् द्योतनात् पित्राचार्य्यादि

य यज्ञेति नदतिनुक्तम् उक्तलक्षणलक्षितनदनवि
शिष्टत्वेन विद्वदीश्वरातिरिक्तमनुष्येष्वप्रतिव्याप्तेः
विद्यादिदातृत्वाभ्युपगमे तु विद्वदीश्वरयोः स्वस्वत्व
निरुक्तिपूर्वक विद्यादिप्रदानाभावेनाव्याप्तेश्च
कर्मफलप्रदत्वेन प्रकाशात्मकत्वेन च स्वयंप्रभा
तनिखिलवेदत्वेन च सुशोभितत्वेन त्रिदिवनिवा
सित्वेन चेन्द्रादीनां परमात्मनश्च देवशब्दशक्यत्वे
विद्वन्मनुजानां देवशब्दशक्यत्वाभावाच्च सर्वथा
देवतावत्त्वरूपत्वेन गौणवृत्त्या तत्र प्रयोगसार्थक
देवशब्दप्रयोगो भवतु नाम माम्रादिष्वपि नैतावता
तेषां सा संज्ञा भवितुमर्हति अन्यथा सित्यपदेनापि
माणवकस्यान्यत्र ग्रहणं स्यादिति आचार्य्यमां
विजानीयादिति वाक्ये चाचार्य्यस्य स्वरूपतयो
पास्यत्वप्रतिपादनेन तद्वीत्याचार्य्ये विनेश्वरस्यान

सितोमा
णवक
इतिवत्र

हरणमेव न स्यात् ईश्वरशब्दस्यार्थान्तरे शक्त्यभ्युपगमे
न निरीश्वरवादिमतस्याङ्गीकर्त्तव्यत्वापत्तेः न तत्र सूर्यो
भातीति काठकमन्त्रस्य वल्ली ५ मं १५ नास्माकमननु
कूलः ईश्वरस्य सूर्यादिप्रकाशकत्वेन स्वप्रकाशत्वात्
ईश्वरस्य मुख्यदेवत्वेन तदुपासनायां च नास्माकं वि
वादः किन्तु तद्रूपाः सर्वे देवा भोगाय विनियुक्ताः ये
च प्रथमम् उपास्याः चेतः शुद्ध्यै ब्रह्मोपासनाज्ञाने
स्वयमेव भवतः उपेयप्राप्तेः उपायसाध्यत्वात् नैनद्दे
वा आप्नुवन् पूर्वमर्शत् य० अ० ४० मं ४ इत्यादौ देवश
ब्देनेन्द्रियाधिष्ठातृदेवाभेदव्यपदेशो वा लक्षणया योग
शक्त्येन्द्रियादिष्वपि देवशब्दशक्तिर्नैतावतेन्द्रादे
न श्रुतिर्योगरूढिर्वा भिद्यते सहितादि शब्दसमर्थको
भिधायित्वे ईश्वरवाचकत्वं विहन्यते किन्तु संयो
गो विप्रयोगश्चेत्यादिना तत्राभिधा नियम्यत इति तत्र
यत्तु गुणादोषकीर्तनं स्तुतिरिति तन्न गुणकीर्तन
स्य स्तुतित्वेन दोषकीर्तनस्य निन्दात्वेन सर्वत्र व्यवहा
रात् तन्मते निन्दोऽपि [illegible] दापत्तेः [illegible] यत्तु कर्मकाण्डे
सकामभागस्तत्र भोगायेश्वरः प्रार्थ्यते उपासना
ज्ञानकाण्डे तु निष्कामभागस्तत्र तत्प्राप्तिरेव [illegible] प्रा
र्थ्यत इति भेद [illegible] न कुत्रापीश्वरार्थत्याग इति

८

वेद्याभिप्राय इति तदुक्तम् कर्मकाण्डे देवतारूपेण
पितृरूपेण चेश्वरस्य पूजाया अभिधानात् उपासना
यां सविशेषस्य ज्ञानकाण्डे निर्विशेषस्य तस्य यथाध
काऽरं प्रतिपादनात् अग्न्यादिदेवतानां स्वरूपस्य का
लत्रये विस्पष्टं प्रतिपादनाच्च कालत्रये पितृस्यैव
प्रतिपाद्यत्वेऽज्ञानकाण्डे तद्विषयं प्रश्नोत्तरं यो युक्तं
त्वाच्च माहाभाग्याद्देवताया एक आत्मा बहुधा स्तू
यते एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति कर्म
जन्मान आत्मजन्मान आत्मैवैषां रथो भवत्यात्मा
ऽश्वा आत्मायुधमात्मेषव आत्मा सर्वं देवस्य देव
स्य नि० अ० ७ खं० ४ इति निरुक्तमपीश्वरस्य सर्वेन्द्रादि
देवतारूपेणावस्थितिं वदति देवतायाः श्रीपरमे
श्वरस्य माहाभाग्यात्सर्वशक्तिमत्त्वादेकस्यापि ब
हुधेन्द्रादिरूपेणावस्थितिः श्रूयते वेदेषु सर्वे देवा
स्तस्याङ्गप्रत्यङ्गरूपाः सन्ति देवस्य देवस्य सर्वमु
पकरणमपि रथादिकं [illegible]मीश्वररूपमेव ई
श्वरत्वघ्नातेषां देवानां तदुपकरणानां चोपास्य
त्वमिति यास्काभिप्रायः तद्यदिदमाहुरित्यादि
वाजसनेयिब्राह्मणानुरोधात् तस्मान्नजह

अग्निं नमस्यतो वसुरिति मन्त्रे ऋ० अ० ४ अ० ५ व० २२ ऋ० ९ मं० १ सोऽग्नि
और्वभृगुवच्छुचिमप्नवानवदा हुवे अग्निं समुद्रवाससमिति
इति मन्त्रे ऋ० अ० ४ अ० ५ व० ७ ऋ० १४ मं० ६ उभयोर्विभागन्वेऽग्निर्देवताया
नये- यं मित्रं न प्रशस्तिभिर्मर्तासो दधिरे पुरः अष्टकादिपूर्ववत् सू० १६ मं० २
अत्र मन्त्रे चान्येषु बहुषु मन्त्रेषु x ४

ठमाग्निमीळे इत्यादिमन्त्रेष्वग्न्यादिपदानीश्वरवाच
कान्येव न चेतनाग्न्यादिदेवताबोधकानीत्याकार
कं याति श्रीवृहत्सायणमाधवाचार्यादिव्याख्या
नखण्डनम् यजुर्ये त्रिंशति त्रयस्पर
इति ऋ० अ०६ त्रयास्त्रिंशतेति यजु० अ०१४ यस्य त्रय
स्त्रिंशद्देवा इति अथर्व० कां० १० प्र० २३ अनु० ४ स होवाच
महिमान इत्यत आरभ्य त्यादित्याश्च हेत इत्यन्तं श०
कां० १४ प्र० १६ एताभिः श्रुतिभिर्देवानां त्रयस्त्रिंशतः
स्वतन्त्वमचेतनत्वेनानुपास्यत्वं च कथयन्ति तद
सुन्दरम् एकस्यापि प्राणपदाभिधेयस्य परमात्मनः य
स्व महिम्नानेकदेवतारूपत्वं देवतानां परात्मरू वे
पाणां निजमहिमवशादनेकरूपत्वमित्यात्म धा
काश्रुतितात्पर्यानवबोधमूलकत्वात् वाज
सनेयिब्राह्मणे शाकल्ययाज्ञवल्क्यसम्वाद एव
मास्नायते अथ हैनं विदग्धः शाकल्यः पप्रच्छ
कति देवा याज्ञवल्क्येति स हैतयैव निविदा प्रति
पेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री
च शता त्रयश्च त्री च सहस्रेत्योमिति स होवा
च कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिंशदित्योमि

ति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति हो
वाच कत्येव देवा याज्ञवल्क्येति त्रय इत्योमिति होवा
च कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच
कत्येव देवता याज्ञवल्क्येति अध्यर्ध [illegible] इमिति होवा   इत्यो×
च कत्येव देवता याज्ञवल्क्येक इत्योमिति होवाच
कतमे ते त्रयश्च त्री च शता च त्रयश्च त्री च सहस्रे
ति स होवाच महिमान एवैषामेते त्रयस्त्रिंश [illegible] देवा इ   त्वेव×
ति कतमे ते त्रयस्त्रिंशदिति अष्टौ वसव एकादश
रुद्रा द्वादशादित्यास्त एकत्रिंशदिन्द्रश्चैव प्रजापति
श्च त्रयस्त्रिंशाविति २ कतमे वसव इति अग्नि
श्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्र
माश्च नक्षत्राणि चैते वसव एतेषु हीदं सर्वं वसु
इदं   निहितमेते हि सर्वं वासयन्ते तद्यदिदं सर्वं वास
यन्ते तस्माद्वसव इति ४ कतमे रुद्रा इति दशेमे पुरु
षे प्राणा आत्मैकादशस्ते यदास्मान्मर्त्याच्छरीराद्
त्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इ
ति ५ कतम आदित्या इति द्वादश वै मासाः संव
त्सरस्यैत आदित्या एते हीदं सर्वमाददाना यन्ति
तद्यदिदं सर्वमाददाना यन्ति तस्मादादित्या इति

६ कतम इन्द्रः कतमः प्रजापतिरिति स्तनयित्नुरेवे
न्द्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनि
रिति कतमो यज्ञ इति पशव इति ७ कतमे ते त्रयो
देवा इतीम एव त्रयो लोका एषु हीमे [illegible] सर्वे देवा
इति कतमौ तौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमो
ऽध्यर्ध इति योऽयं पवत इति ८ तदाहुर्यदयमेक इ
व पवतेऽथ कतममध्यर्ध इति यदस्मिन्निदं स
र्वमध्यार्ध्नोत्तेनाध्यर्ध इति कतम एको देव इति स ब्र
ह्म त्यदित्याचक्षत इति ९ प्रासंगिकानामयमर्थः
उपासनार्थानां देवानां संख्याविस्तारेण कियन्तीति
शाकल्येन पृष्टो याज्ञवल्क्यो विजिगीषुकथायाः प्र
वृत्तत्वात्स्वबुद्ध्या मोहयन्निव प्रत्युत्तरं दत्तवा
न् निविदो वैश्वदेवनामके शस्त्रविशेषे पठि
तानां संख्यावाचिनां पदानां समुदायमाचष्ट इति
वैदिकप्रसिद्धिः यतो यावन्तो देवा वैश्वदेवस्य नि
विद्युच्यन्ते तावन्त उपास्या इत्युक्तं भवति तानि प
दानि त्रयश्च त्री च शता च त्रयश्च त्री च सहस्रेति
[illegible]षात्त्रयं सहस्रत्रयं षट्कं च देवविस्तरः कल्पेवे
त्येवकारेण तवत्र देवानारशीतिकोत्सदस्रे[illegible]

वदेवाः पूर्वं विस्तरतास्ततश्च संक्षेपेण कियन्त इति
च तत्र प्रश्नार्थः कतीति संख्याप्रश्नः कतम इति
संख्येयप्रश्नः एवं च शाकल्येन संख्येयेषु पृष्टेषु
५ कतमे त इत्यनेन याज्ञवल्क्यस्योत्तरं महिमान ए
वैतेषामेते त्रयस्त्रिंशत्त्वेव देवा इति अष्टौ वसव
इत्यादयस्त्रयस्त्रिंशद्देवाः तत्राग्न्यादयोऽष्टौ वस
वः एते हि प्राणिनां कर्मफलाश्रयेण कार्यकार
णसंघातरूपेण परिणमन्तो जगदिदं सर्वं वासय नो ७८ ५१
न्ति तस्माद्वसवः एतेषु शब्दप्रवृत्तिर्यौगिकी ए
तन्महिमस्वीकृतदेवताविग्रहे पुनर्योगरूढिः
कतमे रुद्रा इति दशेमे पुरुषे प्राणाः बुद्धिकर्मे
न्द्रियाणि दशैकादशं च मनः तदेतानि प्राणाः
तद्वृत्तित्वात् ते हि प्रायणकाल उत्क्रामन्तः पुरुषं
रोदयन्तीति रुद्राः कतम आदित्या इति द्वाद
श मासाः संवत्सरस्यावयवाः पुनः पुनर्वर्त्तमा
नाः प्राणभृतामायूंषि च कर्मफलोपभोगं वा
दापयन्तीत्यादित्याः अशनिरिन्द्रः स हि बलं
सा हीन्द्रस्य परमा ईशना तया हि सर्वान्प्राणिनः
प्रमापयति तेन स्तनयित्नुरिन्द्रः यज्ञः प्रजापतिः

५९

यज्ञसाधनं यज्ञरूपं च पशवः प्रजापतिः इन्द्रप्रजाप
तिशब्दौ लक्षणयास्तनयित्नुयज्ञयोर्वर्त्तेते लक्षि
तलक्षणयात्वशनिपश्वोः एत एव त्रयस्त्रिंशद्देवा
इति महिमान एवैते आमेते त्रयस्त्रिंशद्देवा इति नि
र्द्धुवती श्रुतिरेकैकस्य देवतात्मनो युगपदनेकरूप
तां दर्शयति तथा त्रयस्त्रिंशतोपि षडाद्यैतर्भावक्रमेण
कतम एको देव इति प्राण इति प्राणैकरूपतां देवानां
दर्शयन्तीति तस्यैवैकस्य प्राणस्य युगपदनेकरूपतां
दर्शयति षस्तामग्निपृथिवीवाय्वन्तरिक्षादित्यदि
वां महिमानोनन्ततोभियन्ते षडेव तु देवाः तेषु षट्
अग्निं पृथिवीं चैकीकृत्य अन्तरिक्षं वायुं चैकीकृत्य
दिवमादित्यं चैकीकृत्य त्रयो लोकास्त्रय एव देवा भ
वन्ति अन्न एव चैते त्रयोन्नप्राणयोरन्तर्भवन्तोन्नप्रा
णौ द्वौ देवौ भवतः अन्नप्राणौ भोग्यभोक्तृभिमानि
नौ तावप्यध्यर्द्धो देवः एकः कतमोध्यर्द्धो योयं वा
युः पवते कथमयमेक एवाध्यर्द्धः यदस्मिन्सति
सर्वमिदमध्यर्द्धोते नाध्यर्द्ध इति अध्यर्द्धशब्दो रू
ढ्या संख्यावाची योगेन तु समृद्धं वाचष्टे वक्ति वायुः
सूत्रात्मा वायुर्वै गौतम सूत्रमिति श्रुतेः कतम ए
ति स एवाध्यर्द्धः प्राण एको ब्रह्म सर्वदेवात्मत्वेन

इत्यत्वाद्युक्तं न देवस्यादित्याचक्षते त्यच्छब्दः परोक्षवा
ची अध्यक्षतं साक्षात्कारं प्रत्यक्षं प्रतिवृत्तरुणः शास्त्रैकस
मधिगम्यत्वात्पारोक्ष्यमिति तत्र प्राणशब्दवाच्यः
परमात्मैवैको मुख्यो देवः तस्मादेकस्यैव देवस्य म
(देवता॥) हिमवशादनेकरूपतामाह श्रुतिः तथा च मंत्रव
र्णः इन्द्रं मित्रं वरुणमग्निमित्यादि तत्स्वरूपं च श्वेताश्वत
राः पठन्ति एको देवः सर्वभूतेषु गूढः सर्वव्या
पी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्चेति नच देवैकत्वे कथ
मयमैन्द्रोऽयमाग्नेयो मन्त्र ऐन्द्रमाग्नेयं हविरिति भेदे
न व्यपदेश इति वाच्यम् एकत्वेपि देवस्य मूर्तिभेदेन म
न्त्रादिव्यवस्थोपपत्तेः यथा शैवागमेषु शिवस्यैक
त्वेपि दक्षिणामूर्तिचिन्तामणिमृत्युञ्जयादयो म
न्त्रा मूर्तिविशेषेषु व्यवस्थिताः यथा च वैष्णवागमे
षु गोपालवामनादयो मन्त्रास्तथा मूर्तिभेदेन देव
स्य भेदको मन्त्रादिः किं न स्यात् एकस्यैव वास्त
वस्य देवस्य कर्मानुष्ठानदशायामौपाधिकभे
दोऽभ्युपगम्यत एव अत एव वाजसनेयिब्राह्मणे
इति प्रकरणे कर्मानुष्ठानदशायां देवभेदमनू
द्य तदपवादेन वास्तवं देवैकत्वमवधारितं तद्यद

66

पू:

६९ दमाहुरित्यादिना नचैकस्माद्देवात्कालभेदो दुःसंपाद
इति वाच्यम् उपास्तिप्रकारभेदेन तदुपपत्तेः तद्यथा
अथोपासनेन देवभवनीतिश्रुतेः यजु २० रुद्रभावेन
दशविधप्राणानुगृहीत्वा एकादशमात्मानं तन्न वायु
ग्रहणेन तद्ग्रहणात् आत्मनश्च परमात्मदेवाभिन्नत्वा
त् यजुरन्नवदेवा आवहारिकमेतेषु देवत्वं दिव
धातोर्व्यवहारार्थत्वात् नाप्येतेषु चेतनता कुतस्तथा
सत्यं न ह्येतेषु देवत्वं स्वादिवद् दृश्यते चेदिति तदपेक्ष्यम्
मन्त्रार्थवादेतिहासपुराणलोकेभ्यो देवानां चेतनत्वा
भ्युपगमात् मन्त्रार्थवादास्तु इत्थम् ये देवा दिव्येका
दश स्थ पृथिव्यामध्येकादश स्थ- अप्सुक्षितो महि
नैकादश स्थ ते देवासो यज्ञमिमं जुषध्वमिति ऋ.
य. अ. ७ मं १९ सजोषा इन्द्र सगणो मरुद्भिः सोमं
पिब वृत्रहा शूर विद्वान् य. अ. ७ मं ३८ इति आ
तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी य. अ. ८ मं
३३ अहाऋजीषिन्तय इति अ ९ य. मं ४ वातो वा
मनो वा गन्धर्वाः सप्तविंशतिः- ते अग्रेऽश्वमयु
ञ्जंस्ते अस्मिञ्जवमादधुरिति य. अ. ९ मं. ७ जग्रभ्णा
अ४२ ते दक्षिणमिन्द्र हस्तमिति तु विग्रीवो वपोदरः सु
बाहुरन्धसो मद इन्द्रो वृत्राणि जघ्नत इति ६०

ऋ. अ४ ८ अध्या २ सू ४७ मं १० अनु ४
व. ३ मं. २ ४२

विग्रहवत्त्वं चेतनत्वं च देवताया आमनंति अग्नीन्द्रादि
देवतादयः सजोषा इंद्र इत्यादयस्तु हविर्भोजनं इन्द्रादि
वइन्द्र ईशे वृणिच्या इन्द्रो पामिंद्र इत्पर्वतानामिंद्रोर
धाइंद्र इन्नोधिराणामिंद्रः होमे योगे हव्यइंद्र इति ४ अष्ट० ८ अध्या० ४
देवानामीशानं आकृतिभिरेव देवाज्ञुनादः प्रीणाति व० १९ मं० १० अ०
तस्मै प्रीता इषमूर्जं वयच्छंतीति तृप्त एवैनमिंद्रः प्र ३ ७ सू० ८९
जया पशुभिस्तर्पयतीति च श्रुतिर्देवतायाः प्रसादं प्र मं० १० ४४
सन्नायाश्च फलदानं दर्शयति धर्मशास्त्रकारा अपि
नेन्द्रशास्तर्पयन्ते तं सर्वकामफलैः शुभैरिति याज्ञ० अ० १
पुराणवचांसि भूयांसि लौकिका अपि देवताया विग्र
हहविर्भोजनेशनाप्रसादफलदानरूपपंचकं प्रपंच
वदंति॥ स्यादेतत् नतावल्लोको नाम कश्चित्स्वतंत्रे
प्रमाणमस्ति प्रत्यक्षादिभ्य एव हि विचारित विशेषेभ्यः
प्रसिद्धत्वार्थो लोकात्प्रसिद्ध्यति न चात्र प्रत्यक्षादीनाम
न्यतमस्य प्रमाणमस्ति इति तास्यु राणमपि पौरुषेयत्वा
५ त्प्रमाणान्तरमूलतामाकांक्षते अर्थवादा अपि वि स्वार्थेप्रा
धिनैकवाक्यत्वोत्तलस्यार्थाः सन्तो न स्वार्थे ग्रंथेन माण्येन
देवादीनां विग्रहादिसंभवे कारणभावं प्रतिपद्यंते
यत्परः शब्दः स शब्दार्थ इति शब्दन्यायविदुक्तेः प्र
माणान्तरेणान्यत्र स्वार्थोपि समर्प्यते यथा वायोः दे

६२

पिष्टत्वं तत्प्रमाणान्तरवशात्सोमपदेयनेन तु शब्दसाम
र्थ्यात् यत्र तु न प्रमाणान्तरमस्ति यथा देवताविग्रहा
दिष्वलौकिकेऽर्थे शब्दादेवावगन्तव्यः अन्यपरशब्देन
तदवगमयितुमशक्यमिति तदवगमायास्मतत्रापि ता
त्पर्यमभ्युपेतव्यम् न चैकं वाक्यमुभयपरं भवतीति वा
क्यभेदेन न च संभवत्येकवाक्यत्वे वाक्यभेदो युक्तस्ते
नस्मात्प्रमाणान्तरानधिगतविग्रहादिमत्ताऽन्यपरात्
शब्दादवगन्तव्येति मनोरथमात्रमिति मन्त्रास्त्वब्रीह्यादि
वत्प्रकृत्यादिभिस्तत्रतत्र विनियुज्यमानाः प्रमाणाभावा
न तु प्रवेशिनः कथमुपयुज्यन्तां तेषु तेषु कर्मस्वित्यपे
क्षायां दृष्टप्रकारे संभवति नादृष्टकल्पनोचिता दृष्टं
च प्रयोगसमवेतार्थस्मारणं स्मृत्वा च जानातीति अनुष्ठा
तारः पदार्थान् उत्सर्गौ चार्थपरतापदानामित्यपेक्षित
प्रयोगसमवेतार्थस्मरणतात्पर्याणां मन्त्राणां नानधिग
ते विग्रहादावपि तात्पर्यं युज्यत इति न तेभ्योऽपि तत्सि
द्धिरिति तस्माद्देवताविग्रहवत्त्वादिग्राहकप्रमाणाभा
वस्तमिति चेन्न ॥ प्रत्ययाप्रत्यययोर्हि सद्भावासद्भावयोः कार
णं नान्यार्थत्वमनन्यार्थत्वं वा तथाहि अन्यार्थमपि प्र
स्थितः पथि पतितं तृणपर्णादि पश्यतीति प्रतिपद्यते न च त
त्र हि तृणपर्णादिविषयं प्रत्यक्षं प्रवृत्तमस्ति येन तद

न्

राव

६१

सितं प्रतिपद्यते ऽत्र पुनर्विध्युद्देशैकवाक्यत्वाभावेन स्तु
त्यर्थार्थवादेन पार्थगर्थ्येन स्वज्ञानविषया प्रवृत्तिः श
क्याध्यवसितुम् शाब्दी खल्वियं गतिर्यत्तात्पर्याधीनवृ
त्तित्वं न स्वपरः शब्दोऽन्यत्र प्रमाणं भवितुमर्हति न हि श्वि
त्रा निर्णेजनं परं मेतो धावतीति वाक्यमितः सारमेयवे
गवद्गमनं गमयितुमर्हति न हि मत्तवाक्ये प्रत्यायकेऽवा
न्तरवाक्यस्य पृथक् प्रत्यायकत्वमस्ति यथा न सुरां पिबेदि
ति मत्त इति वाक्ये पदत्रयसम्बन्धात्सुरापानप्रतिषेधप्रत्यये
कार्थोऽवगम्यते न पुनः सुरां पिबेदिति पदद्वयसंबंधा
त्सुरापानविधिरपीति शक्यते वगन्तुं न च प्रत्ययमात्रा
त्सोऽप्यर्थोऽसाभवति तस्यान्ययस्य भ्रान्तित्वात् न पुनः प्रम
त्याहेनामियं गतिः न खलु दकाहरणार्थिना घटदर्शनाद्यो
मीलितं चक्षुर्घटपटौ वा परं वा केवलं नोपलभत इति
वाच्यमयुक्तं यत्सुरापानप्रतिषेधे पदान्वयस्यैकत्वाद
वान्तरवाक्यार्थस्याग्रहणम् विध्युद्देशार्थवादयोस्त्वर्थ
वादस्यापि पदानि पृथगन्वयं स्वज्ञानविषयं प्रतिपद्य
नन्तरं कौमर्थ्यवशेन विधेः स्तावकत्वं प्रतिपद्यन्ते यथा
हि वायव्यं श्वेतमालभेत भूतिकाम इत्यत्र विध्युद्देशव
र्त्तिनां वायव्यादिपदानां विधिसम्बन्धो नैवं वायुर्वै क्षेपि
ष्ठा देवता वायुमेव स्वेन भागेनोपधावति स एवैनं भूति
गमयतीत्येषामर्थवादगतानां पदानाम् न हि भवति

वायुर्वैं आलभेत तद्धेपिष्ठा देवता आलभेतेत्यादिर्वीयुस्व
भावसंकीर्तनेन त्ववान्तरमन्वयं प्रतिपद्यैवं विशिष्टदे
वत्यमिदं कर्मेति विधिं स्तुवन्ति न पुनः सोवान्तरवाक्यार्थः
प्रमाणान्तरगोचरो भवति न तत्तदनुवादेनार्थवादः प्र
वर्त्तते यत्र प्रमाणान्तरविरुद्धस्तत्र गुणवादेन यत्रतु
भयं नास्ति तत्र किं प्रमाणान्तराभावाद्गुणवादः स्यादु
तोस्वित्प्रमाणान्तराविरोधाद्विद्यमानवाद इति प्रतीतिश
रणो विद्यमानवादस्तावत्प्रत्यणीयो न गुणवादः एतेन म
न्त्रो व्याख्यातः अपि च विधिभिरेवेन्द्रादि देवत्यानि ह
वींषि चोदयद्भिरपेक्षितमिन्द्रादीनां स्वरूपम् न हि स्वरू
परहिताइन्द्रादयश्चेतस्मारोपयितुं शक्यन्ते न च चेतनस्यना
रूढायै तस्यै देवतायै हविः प्रदातुं शक्यते श्रावयतिव
यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्
करिष्यन्निति न च शब्दमात्रमर्थस्वरूपं संभवति
शब्दार्थयोर्भेदात् यत्र याहृशं मन्त्रार्थवादयोरिन्द्रा
दीनां स्वरूपमवगतं तेन तत्ताहृशं शब्दप्रमाणकेन
प्रत्याख्यातुं युक्तम् इतिहासपुराणमपि व्याख्या
तेन मार्गेण संभवन्मन्त्रार्थवादमूलत्वात्प्रभवति
देवताविग्रहादिप्रपञ्चयितुम् प्रत्यक्षादिमूल
मपि संभवति भवति ह्यस्माकमप्रत्यक्षमपि
चिरन्तनानां प्रत्यक्षम् तथा च वेदवादयो व्यासा

दिभिः प्रत्यक्षं व्यवहरन्तीति स्मर्य्यते यज्ञकूर्यादिस्तंनीत
मानामिव पूर्वेषामपि नास्ति देवादिभिर्व्यवहर्तुं सा
मर्थ्यमिति सत्ययुगे चित्रं प्रतिषेधे इदानीमिव
वचनान्न दापि सार्वभौमः क्षत्रियोस्तीति ब्रूयात्तत
श्च राजसूयादिचोदनाउपरुन्ध्यादिदानीमिव
च कालान्तरेप्यनवस्थितप्रायान्वर्णाश्रमधर्मा
न्प्रतिजानीत ततश्च व्यवस्थाविधायि शास्त्रम
नर्थकं कुर्य्यात् तस्माद्धर्मोत्कर्षवशाच्चिरन्तना
देवादिभिः प्रत्यक्षं व्यवजह्रुरिति गम्यते अपि
च स्मर्य्यते स्वाध्यायादिष्टदेवतासंप्रयोग इति
दि योगोप्यणिमाद्यैश्वर्य्यप्राप्तिफलः स्मर्य्यमाणो
न शक्यः साहसमात्रेण प्रत्याख्यातुम् श्रुतिश्च
योगमाहात्म्यं प्रख्यापयति पृथ्व्यप्यतेजोनिल
खे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते - न तस्य
रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरी
रमिति [illegible] ऋषीणामपि मंत्रब्राह्मण
दर्शिनामस्मदीयेन सामर्थ्येनोपमातुं युक्तम् -
तस्मात्समूलमितिहासपुराणम् - लोकप्रसिद्धि
रपि न सति संभवे निरालंबनाध्यवसातुं युक्ता
तस्मादुपपन्नो मंत्रादिभ्यो देवादीनां विग्रहवत्त्वा

न्वः =

श्वेताश्वत रोपनिषदि अध्याय २ मं. १२ ×

न

६३ द्यवगमः इत्यलमतिप्रसङ्गेन । इममेवार्थं श्रीभग
वान्वेदव्यासोपि सूत्रयामास । तदुपर्यपि बादराय
णः संभवात् । अ० १ सू० । अस्यार्थमनु हृदयाद्यपेक्ष
यानुमनुष्याधिकारत्वादिति पूर्वसूत्रे अंगुष्ठमात्रः ५.
पुरुषोन्तरात्मा सदा जनानां हृदये सन्निविष्टः इत्य श्वेताश्वतर अ ३ श्रु १३ ×५
५. त्रांगुष्ठमात्रश्रुतिर्मनुष्यहृदयापेक्षया मनुष्याधि
कारत्वाच्छास्त्रस्येत्युक्तं तत्प्रसङ्गेनेदमुच्यते बाढं
मनुष्यानधिकरोति शास्त्रं न तु मनुष्यानेवेतीह
ब्रह्मविज्ञाने नियमोस्तीति प्रतिपादनायाह । तदु
परीति तेषां मनुष्याणामुपरि ये देवादयस्तानप्यधि
करोति शास्त्रमिति बादरायण आचार्यो मन्यते क
स्मात् संभवात् संभवति हि तेषामप्यर्थित्वाद्यधिका
रकारणम् तत्रार्थित्वं तावन्मोक्षविषये देवादीना
मपि संभवति विकारविषयविभूत्यनित्यतालो
चनादिनिमित्तम् तथा सामर्थ्यमपि तेषां संभव
ति मन्त्रार्थवादेतिहासपुराणलोकेभ्यो विग्रहव
त्त्वाद्यवगमात् न च तेषां कश्चित्प्रतिषेधोस्ति न चो
पनयनशास्त्रेणैषामधिकारो निवर्त्त्येतोपनयन
स्य वेदाध्ययनार्थत्वात् तेषां च स्वयं प्रतिभातवे
दत्वात् स च मनुष्याणामिह जन्मनीव देवानां प्रा ६३

चिमवे विधिवदधीत आम्नाय इहजन्मनि स्मर्यमाण:
अतः स्वयं प्रतिभातो वेदः सम्भवति अपि चैषां वि
द्याग्रहणाय ब्रह्मचर्यादि दर्शयति श्रुतिः एकश
तं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास
भृगुर्हि वै वारुणिर्वरुणं पितरमुपससार अधीहि
भगवो ब्रह्मेत्यादि यदपि कर्मस्वनधिकारकारण
मुक्तं न हि देवानां देवतान्तराभावादृषीणामार्षेयान्त
राभावात् प्राचां वसुभृग्वादीनां क्षीणाधिकारत्वेनेदा
नीं देवर्षित्वाभावात् इति न तद्विद्यास्वस्ति न हीन्द्रा २
दीनां विद्यास्वधिक्रियमाणानामिन्द्राद्युद्देशेन किञ्चि
त्कृत्यमस्ति न च भृग्वादीनां भृग्वादिसगोत्रतया - त
स्माद्देवादीनामपि विद्यास्वधिकारः केन वार्यते दे
वाद्यधिकारेऽप्यङ्गुष्ठमात्रश्रुतिः स्वाङ्गुष्ठमात्रापेक्षया
न विरुध्यत इति ॥ स्यादेतद्यदि विग्रहवत्त्वाद्यभ्युपग
मेन देवादीनां विद्यास्वधिकारो वर्ण्येत विग्रहवत्त्वा
दृत्विगादिवदिन्द्रादीनामपि स्वरूपसन्निधानेन यागे
ऽङ्गभावोऽभ्युपगम्येत तदा च विरोधः कर्मणि स्यात् न
हीन्द्रादीनां स्वरूपसन्निधानेन यागेऽङ्गभावो दृश्यते न
च सम्भवति बहुषु यागेषु युगपदेकस्येन्द्रस्य स्वरूपस
न्निधानानुपपत्तेः एतदुक्तं भवति मन्त्रादिपदसमुच्च
यात् प्रतीयमानोऽर्थः प्रमाणान्तराविरोधे सत्युपेतव्यो न

नुविरोधे प्रमाणान्तरविरुद्धं चेदं विग्रहवत्त्वादि देव
तायाः तस्माद्यजमानः प्रस्तरइत्यादिवदुपचारितोऽर्थो
मन्त्रादिभीरण्येयः तथा च विग्रहाद्यभावात् इन्द्रोपहि
तोऽर्थोऽर्थोपहितो वा शब्दो देवतात्वेन तत्वान्नास्याः
क्वचिदधिकारः [illegible] स्यापेक्षास्त्वम् विरोधः
कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् अयमस्य
अस्यार्थः नायमस्ति विरोधः कस्मात् अनेकप्र
तिपत्तेः एकस्यापि देवतात्मनो युगपदनेकस्वरूपप्र
तिपत्तिः सम्भवति कथमेतदवगम्यते दर्शना
त् श्रुतिषु स्मृतिषु च तथा हि एकस्यानेककायनि
र्माणं अदर्शनाद्वानुपपत्ते बाधदर्शनाद्वा न प्रथ
मः श्रुतिस्मृतिभ्यां दर्शनात् न हि लौकिकप्रमाणे
नादृष्टत्वादागमेनादृष्टमदृष्टं भवति नाभ्युदयागादी
नामपि स्वर्गादिसाधनत्वमदृष्टमिति मनुष्यशरी
रस्य मातापितृसंयोगजत्वनियमादसति पित्रोः सं
योगे कुतः संभवः संभवे वाऽग्निरहितोऽपि धूमः स्या
दिति न द्वितीयः किं शरीरत्वेन हेतुना देवादिशरी
रमपि सिषाधयिषसि तथा चानेकान्तो हेत्वाभासः
संस्वेदजोद्भिज्जानां शरीराणां मातृहेतुत्वात् इच्छा
मात्रनिर्माणत्वं देहानामदृष्टचरमिति चेन्न भूतोपा
दानत्वेन इच्छामात्रनिर्माणत्वासिद्धेः भूतवशिनां

= बाध...

शरीरं मातृपितृसंयोग
जन्यं शरीरत्वान्मनुष्यशरी
रवदित्यनुमानम् = ५

हि देवादीनां नानाकायश्चिकीर्षावशाद्भूतक्रियोत्पत्तौ भू-
तानां परस्परसंयोगेन नानाकायसमुत्पादनात् इ-
ष्टा च वशिन इच्छावशाद्रूपे क्रिया यथा विषविद्या-
विद इच्छामात्रेण विषशकलप्रेरणम् न च विषवि-
द्याविदो दर्शनेनाधिष्ठानदर्शनात् व्यवहितविप्र-
कृष्टभूतादर्शनाद्देवादीनां कथमधिष्ठानमिति वा-
च्यम् काचाभ्रपटलपिहितस्य विप्रकृष्टस्य भौमश-
नैश्चरादेर्दर्शनेनातिव्यभिचारात् अस्मत्कादृश्-
यो देवादीनां काचाभ्रपटलादिवन्महीधरादिभि-
र्नैव व्यवधीयन्ते न चास्मदादिवत्तेषां शरीरित्वेन व्य-
वहितविप्रकृष्टादिदर्शनासंभवोऽनुमीयत इति
वाच्यम् आगमविरोधिनोऽनुमानस्यात्याप्रयोगा-
त् अन्तर्धानं चाञ्जनादिना मनुजानामिव तेषां प्र-
भाववत्त्वादुपपद्यते तेन सन्निहितानामपि न कुत्र
देशे दर्शनं भविष्यति तस्मात्सूक्तमनेकप्रतिपत्ते-
रिति तथा हि कति देवा याज्ञवल्क्येनोपक्रम्य त्रयश्च
त्री चेत्याद्युत्तरं दत्त्वा पुनः शाकल्येन कतमे त इति संरम्भे
ये पृष्टे पुनस्सोत्तरं महिमान एवैते एषामेते त्रयस्त्रिंश-
त्त्वेव देवा इति एकैकस्य देवतात्मनो महिमवशाद्यु-
गपदनेकरूपतामाह तथा प्राणो करूपतां देवानां द-
र्शयन्ती श्रुतिस्तस्यैवैकस्य प्राणस्य युगपदनेकरूप

बादरायणस्सूत्रञ्चात्र - प्रदीपवदावेशस्तथा हि दर्शयति अ॰ पा॰ सू॰ योगिनां स्वेच्छया कायवाऽुत्पत्त्युपसंहारो भवन इत्यर्थः ।२८

नां दर्शयति स्मृतिरपि आत्मनो वै शरीराणि बहूनि भ
रतर्षभ योगी कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत्
प्राप्नुयाद्विषयान्कैश्चित्कैश्चिदुग्रं तपश्चरेत् संक्षि
पेच्च पुनस्तानि सूर्यो रश्मिगणानिवेति शारी० प्राप्ता
णिमाद्यैश्वर्याणां योगिनामपि युगपदनेकशरी
रयोगं दर्शयति किमु वक्तव्यमाजन्मसिद्धानां देवा
नामनेकरूपप्रतिपत्तिरिति अनेकप्रतिपत्तेरित्य
स्यापरा व्याख्या विग्रहवतामपि कर्मसु भावचोदना
स्वनेकाप्रतिपत्तिर्दृश्यते क्वचिदेको विग्रहवाननेकत्र
युगपदङ्गभावं गच्छति यथा बहुभिर्भोजयद्भिर्नैको
ब्राह्मणो युगपद्भोज्यते क्वचिच्चैको विग्रहवाननेकत्र
युगपदङ्गभावं गच्छति यथा बहुभिर्नमस्कुर्वाणैरेको
ब्राह्मणो युगपन्नमस्क्रियते तद्वदिहोद्देश्यपरित्या
गात्मकत्वाद्यागस्य विग्रहवतीमप्येकदेवतां स्वस्था
नस्थितां युगपद्बहवो नानादेशावस्थिता यजमानाः
स्वं स्वं द्रव्यं युगपत्परित्यक्ष्यन्तीति विग्रहवत्त्वेऽपि देवा
दीनां न किंचित्कर्मणि विरुध्यत इति—
मा नाम विग्रहवत्त्वे विरोधः प्रसञ्जि शब्दे तु अर्थेन
नित्यसम्बन्धाभावाद्विरोधः प्रसज्यत इत्याशंक्य सूत्रय
ति शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् अ
१ पा० ८ अस्यार्थस्तु पूर्वमस्माभिरुक्तस्तत्र द्रष्टव्यः

अथ चान्तदैवसूत्रम् मध्वादिष्वसम्भवादनधिका
रं जैमिनिः अ१ पा३ सू३१ अस्यायमर्थः ब्रह्म
विद्यास्वधिकारं देवर्षीणांनुवारणः अत्र चोद्यते
किं सर्वासु ब्रह्मविद्यासु सर्वेषामविशेषेण किं वा
कासुचिदेव केषांचित् यद्यविशेषेण सर्वासु तद
मध्वादिविद्यास्वसम्भवः कथं असौ वा आदित्यो
देवमध्विति अत्र मनुष्या आदित्यं मध्वध्यासेनोपा
सीरन् देवादिषु ह्युपासकेष्वभ्युपगम्यमानेष्वा
दित्यः कमन्यमादित्यमुपासीत प्राचामादित्याना
मस्मिन्कल्पे क्षीणाधिकारत्वात् पुनश्चादित्यव्य
पाश्रयाणि पञ्च रोहितादीन्युपक्रम्य वसवो रुद्रा
आदित्या मरुतः साध्याश्च पञ्च देवगणाः क्रमेण
८ तत्तदमृतमुपजीवन्तीत्युपदिश्य स य एतदेवममृतं
वेद वसूनामेवैको भूत्वाग्निनैव मुखेनैतदेवामृ
तं यशसो इन्द्रियसाकल्यवीर्यान्नादिरूपं दृष्ट्वा तृ — उपल भ्य=
प्यतीत्यादिना वस्वाद्युपजीव्यान्यमृतानि विजान
तां वस्वादिमहिमप्राप्तिं दर्शयति वस्वादयस्तु का
नन्यान्वस्वादीनमृतोपजीविनो विजानीयुः कं वा
न्यं महिमानं प्रेप्सेयुरिति तथा हि छान्दोग्योपनि
षदि असौ वा आदित्यो देवमधु तस्य द्यौरेव तिर

श्चीनवंशो ऽन्तरिक्षमपूपो मरीचयः पुत्राः १ तस्य
प्राञ्चो रश्मयस्ता एव प्राच्यो मधुनाड्यः ऋच एव म
धुकृतः ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा ए
ता ऋचः २ एतमृग्वेदमभ्यतपंस्तस्याभित
प्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसो ऽजाय
त ३ तद्व्यक्षरत्तदादित्यमभितो ऽश्रयत्तद्वा एतद्य
देतदादित्यस्य रोहितं रूपम् ४ एवं दक्षिणार
श्म्यादीन्युपदिश्य तद्यत्प्रथमममृतं तद्वसव उपजी
वन्त्यग्निना मुखेन न वै देवा अश्नन्ति न पिबन्त्येत
देवामृतं दृष्ट्वा तृप्यन्ति एतदेव रूपमभिसंविश
न्त्येतस्माद्रूपादुद्यन्ति २ स य एतदेवममृतं वेद व
सूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृ
ष्ट्वा तृप्यति स य एतदेवरूपमभिसंविशत्येतस्मा
द्रूपादुदेति ३ स यावदादित्यः पुरस्तादुदेता पश्चा
दस्तमेता वसूनामेव तावदाधिपत्यं स्वाराज्यं प
र्येता इत्यादि एतद्ध्येयं देवानां मोदनान्मध्वि
व मधु भ्रामरं मधुसारूप्यमाह श्रुतिः तस्य मधुनो
द्यौरेव तिरश्चीनवंशः अन्तरिक्षं मध्वपूपः आदित्य
स्य मधुनो ऽपूपः पटलमन्तरिक्षमाकाशं तत्राव-
पयः स्थानात् यानि च सोमाज्यप्रभृतीन्यग्नौ हूयन्ते ता
न्यादित्यरश्मिभिरग्नेः संवलितैः रसत्वमापन्नान्य

मतीर्थत्वमापन्नान्यादित्यमण्डलमध्यं त्वमधुपं नीयन्ते
यथा हि भ्रमराः पुष्पेभ्य आहृत्य मकरन्दं स्वस्थानमा
नयन्त्येवं मन्त्रा भ्रमराः प्रयोगसमवेतार्थस्मरण
दिभिः ऋग्वेदविहितेभ्यः कर्मकुसुमेभ्य आहृत्य त
न्निष्पन्नमकरन्दमादित्यमण्डले रोहिताभिरस्य प्रा
चीभी रश्मिनाडीभिरानयन्ति तदमृतं वसव उपजी
वन्ति तथास्यादित्यमधुनो दक्षिणाभी रश्मिनाडीभिः
शुक्लाभिर्यजुर्वेदविहितकर्मकुसुमेभ्य आहृत्याग्नौ
हुतं सोमादि पूर्ववत् अमृतभावमापन्नं यजुर्वेदम
न्त्रभ्रमरा आदित्यमण्डलमानयन्ति तदेतदमृतं रुद्रा उप
जीवन्ति तथास्यादित्यमधुनः प्रतीचीभी रश्मिनाडी
भिः कृष्णाभिः सामवेदविहितकर्मकुसुमेभ्य आहृ
त्याग्नौ हुतं सोमादि पूर्ववदमृतभावमापन्नं सामवे
दस्तोत्रमन्त्रभ्रमरा आदित्यमण्डलमानयन्ति तदमृ
तमादित्या उपजीवन्ति- अथास्यादित्यमधुन उदीचीर
भिरतिकृष्णाभीरश्मिनाडीभिरथर्ववेदविहितेभ्यः क
र्मकुसुमेभ्य आहृत्याग्नौ हुतं सोमादि पूर्ववदमृत
त्वमापन्नमथर्वाङ्गिरसमन्त्रभ्रमरास्तथाश्वमेध
वाचस्तोमकर्मकुसुमादितिहासपुराणमन्त्रभ्रम
रा आदित्यमण्डलमानयन्ति तदमृतं मरुत उपजीव
न्ति अश्वमेधे वाचस्तोमे च पारिप्लवं शंसतीति श्र
वणादितिहासपुराणमन्त्राणामप्यस्ति प्रयोगः

अथ यासादित्यमधुन ऊर्ध्वरश्मिनाथो गोप्यासामितस्या
सन्भ्रमरैः प्रणवकुसुमादाहृत्यादित्यमण्डलमान
यन्ति तदमृतमुपजीवन्ति साध्या इति किं च तत्रैव
अग्निः पादो वायुः पाद आदित्यः पादो दिशः पादो वा
युर्वाव संवर्ग आदित्यो ब्रह्मेत्यादेश इत्यादिश्रुतिषु
यथाहि गोप्यादानगतादिप्रयुक्तनैरावमग्न्यादयो वि
नाकाशेन सर्वगतेनेत्यध्येकासु ब्रह्मणश्चत्वारः पा
दा अग्न्यादयो दर्शिताः तथा च तेषामेव देवानां नासु
देवतात्मोपासनास्वधिकारः संभवति तथैमावेव गौ
तमभरद्वाजावयमेव गौतमोऽयं भरद्वाज इत्यादिषु
षिसंबंधेषूपासनेषु न तेषामेवर्षीणामधिकारः
संभवति अतश्च न देवादीनामधिकार इति यदुच्ये
तन्नाविशेषेण सर्वेषां देवर्षीणां सर्वासु ब्रह्मविद्या
स्वधिकारः किन्तु यथासंभवमिति तत्रेदमुपतिष्ठते
सूत्रम् ज्योतिषि भावाच्च अ १ पा. ४ सू ३२ यदिदं
ज्योतिर्मण्डलं द्युस्थानमहोरात्राभ्यां बभ्रमज्जगदवभा
सयति तस्मिन्नादित्यादयो देवतावचनाः शब्दाः प्र
युज्यन्ते लोकप्रसिद्धेर्वाक्यशेषप्रसिद्धेश्च न चैतेषा
मस्ति चैतन्यम् न चैतेषु देवतादिवत्तत्स्वरूपाह इष्यते
चेष्टा न च ज्योतिर्मण्डलस्य हृदयादिना विग्रहेण चेत
नतयार्थित्वादिना वा योगोऽवगन्तुं शक्यते मृदादिव
दचेतनत्वावगमादेतेनाग्न्यादयोऽपि व्याख्याताः तस्मा

द्देवताविग्रहवत्त्वादिग्राहकप्रमाणाभावान्न देवानाम
धिकार इति पूर्वपक्षमुपन्यस्य दूषयति भावन्तु बा
दरायणोऽस्ति हि अ० १ पा० ३ सू० ३३ अस्य सूत्रस्यायमर्थः
तुशब्दः पूर्वपक्षं व्यावर्त्तयति बादरायणस्त्वाचार्यो
भावमधिकारस्य देवादीनामपि मन्यते यद्यपि मध्वा
दिविद्यासु देवतादिव्यामिश्रास्वसम्भवोऽधिकारस्य
तथाप्यस्ति हि शुद्धायां ब्रह्मविद्यायां सम्भवोऽर्थित्व
सामर्थ्याप्रतिषेधाद्यपेक्षत्वादधिकारस्य न च क्वचिद
सम्भव इत्येतावता यत्र संभवस्तत्राप्यधिकारोऽपोद्ये
त मनुष्याणामपि न सर्वेषां ब्राह्मणादीनां राजसूया
दिष्वधिकारः संभवति तत्र यो न्यायः सोऽत्रापि भविष्य
ति ब्रह्मविद्यां च प्रकृत्य भवति दर्शनं श्रौतम् तद्यो यो
देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणामिति ते
होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य
सर्वांश्च लोकानाप्नोति सर्वांश्च कामानितीन्द्रो ह वै देवा
नामभिप्रवव्राज विरोचनोऽसुराणामित्यादि च स्मा
र्त्तमपि गन्धर्वयाज्ञवल्क्यसंवादादि यदप्युक्तं ज्योति
षि भावाच्चेत्यत्र ब्रूमः ज्योतिरादिविषया अप्यादि
त्यादयो देवतावचनाः शब्दाश्चेतनावन्तमैश्वर्याद्युपे
तं तं तं देवतात्मानं समर्पयन्ति मन्त्रार्थवादादिषु तथा
व्यवहारात् अस्ति ह्यैश्वर्ययोगाद्देवतानां ज्योतिरा
द्यात्मभिश्चावस्थातुं यथेष्टं च तं तं विग्रहं ग्रहीतुं साम

६८

र्थ्यम् तथाहि सुब्रह्मण्यार्थवादे श्रूयते मेधातिथेर्मे
धत्तेति मेधातिथिं ह काण्वायनं मेषो भूत्वा जहारे
ति स्मर्यते च आदित्यः पुरुषो भूत्वा कुन्तिमुपजगा
मेति शारी॰ मृदादिष्वपि चेतना अधिष्ठातारोऽभ्युप
गम्यन्ते मृदब्रवीदापोऽब्रुवन्निति दर्शनात् ज्योतिरा
देस्तु भूतधातोरादित्यादिष्वचेतनत्वमभ्युपेयते चे
तनास्त्वधिष्ठातारो देवतात्मानो मन्त्रार्थवादादिष्वव
हारात् इति ततश्चादित्यादिसंभवादुपपन्नो देवा
दीनामपि ब्रह्मविद्यास्वधिकारः क्रममुक्तिदर्शनाच्चैव
मेवोपपद्यत इति दिक् एतेन श्रुत्यर्थनिर्णायकश्री
भगवद्बादरायणाचार्यप्रणीतसूत्रोक्तस्वतन्त्रार्थपर्या
लोच "तया देवानां महिमवशात् ऐश्वर्यादिरूपत्वं देवा
श्चेतना इन्द्रादयो भूतिकामैर्मोक्षफलामसत्तानोपा
स्यभूतचेतःशुद्धिकामैश्चोपास्या देवाश्च ईश्वराद
भिन्ना ईश्वरस्यैव निजमहिम्ना तत्तद्देवतारूपेणा
वस्थानात् तथा चेश्वरबुद्ध्या देवोपासनमार्यीश्च
कुः कुर्वन्ति करिष्यन्ति च देवानामचेतनतामी
श्वरभिन्नतां च वदन्तो वेदार्थानभिज्ञा अनार्यश्चार
वतऽज्ञाय श्चोपेक्ष्याः सुधीभिरिति स्थितम् ॥
॥ यत्तु वदति आत्मेत्येवोपासीतेति श्रुत्या शान्तपेयस्य
याईश्वराद्भिन्नस्योपासनानि[illegible]ति ॥ तत्तुच्छम्
राकृते×

ऽआत्मानन्यत्वेनोपासनस्यैव सर्वोत्कृपासनासु मुख्यत्वात्तथा
न्यात्मनोऽभेदेनोपासनाया विधानात् अथ योऽन्यां
देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा
पशुरेवं स देवानामिति श्रुतावनात्मविदो देवभो
ग्याभावस्य दर्शनाच्च अयमर्थः स चास्मिँल्लोके इष्टा
पूर्त्तादिकर्मभिः श्रीरायन्पशुवद्देवानामुपकरोति
अमुष्मिन्नपि तदुपजीवी तदादिष्टफलमुपभुञ्जा
नः पशुवदेव देवानामुपकरोतीति गम्यतेऽनात्म
वित्त्वात् तथा चायमात्मा ब्रह्मेति ब्रह्माहमस्मीति मह
वाक्यानामर्थाविदस्तस्यैवानार्यत्वं [illegible] स्फुटमुपलभ्य
[illegible]तेइति ऋग्वेदादि० अंके १ पत्रे ९९ अजुसंगितयेम
शुद्धमनुसंगितयेति साधु— यजुर्वेदे जडचेतनयोः पू
जाविधानात्ते संशयास्पदं आज्ञाः सन्तीत्याशंक्याह ज
डानां पूजा सत्कारः प्रियाचरणादिरूप इति तदुक्त
मलपनम् जडवस्तुनि सत्कारप्रियाचरणयोरन
र्थकत्वात् तस्मिंस्तदाचरणस्य प्रियाप्रियत्वाभा
वाच्च तदधिष्ठातुर्देवस्य तत्र तत्र पूजाविधानमिति
तच्चोद्यप्रतिवचनत्वात् यच्च मातृदेवो भव पितृदे
वो भवा[illegible] वार्य्यदेवो भवातिथिदेवो भवेति
तैत्तिरीयोपनिषदि प्रपा० ७ अनु० १५ त्वमेव प्रत्यक्षं
ब्रह्मासि [illegible] त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामीति तैत्ते

अतएव देवपितृकार्याभ्यां न प्रमदितव्यमिति मातृदेवो भवेत्यस्या
दिस्तत्र दृश्यते

व ब्र० ७ अ० १ पञ्चदेवताः सर्वमनुष्योपास्यत्वेनोक्ताः स
शरीराः निःशरीरमेतेषु ब्रह्मैव तदतिरिक्तम् एतेषु
चतुर्षु मात्रादिषु देवतात्वाभावेपि देवबुध्या उपास्यत्वं तत्
त्राभिधानात् श्रातन्त्रामादौ विष्णुबुद्धेव तं यथा यथो
पासते तेन देव भवतीति श्रुतेः अतएव निरुक्तकारो
प्याह अपि वा सा कामदेवतास्यात् प्रायो देवता वास्ति
ह्याचारो लोके देवदेवत्यमतिथिदेवत्यं पितृदेवत्यं
याज्ञदेवतो मन्त्र इति अन्यदप्येवं व्यं विस्तरभीते
रुपरम्यते इति श्री फगवाडाख्यनगरवासि ब्राह्म
करजातीय गोविन्दरामरचिते दयानन्दमतम
र्दने द्वितीयः खण्डः समाप्तः शुभमस्तु

106